
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

।। श्री माधवीये वेदार्थप्रकाशे ऐतरेय ब्राम्हणे पंदशोध्याय: ।।

श्रीगणेशायनमः मूल ॐअथातःपशोर्विभक्तिस्तस्यविभागंवक्ष्यामो हनूसजिव्हेप्रस्तोतुः
श्येनंवक्षउद्गातुः कंठःकाकुद्रःप्रतिहर्तुर्दक्षिणाश्रोणिर्होतुःसव्याब्रह्मणो दक्षिणंसक्थिमैत्राव
रुणस्यसव्यंब्राह्मणाच्छंसिनोदक्षिणंपार्श्वंसांसमध्वर्योःसव्यमुपगातृणां सव्योंसः प्रतिप्रस्थातु
र्दक्षिणंदोर्नेष्टुःसव्यंपोतुर्दक्षिणऽऊरुरच्छावाकस्यसव्यऽआग्नीध्रस्यदक्षिणोबाहुरात्रेयस्य
सव्यःसदस्यस्यसदंचानूकंचगृहपतेर्दक्षिणौपादौगृहपतेर्व्रतप्रदस्यसव्यौपादौगृहपतेर्भार्या
येव्रतप्रदस्यौष्ठऽएनयोःसाधारणोभवतितंगृहपतिरेवप्रशिष्याज्जाघनींपत्नीभ्योहरंति तां
ब्राह्मणायदद्युः स्कंध्याश्चमणिकास्तिस्रश्चकीकसाग्रीवास्तिस्रश्चकीकसार्द्धंचैववैकर्त १
स्योन्नेतुरर्धंचैववैकर्तस्यक्लोमाचशमितुस्तद्ब्राह्मणायदद्याद्यद्यब्राह्मणःस्याच्छिरःसुब्रह्मण्यै
येयःश्वःसुत्यांप्राहतस्याजिनमिडासर्वेषांहोतुर्वा १ भाष्य वर्णितंशास्त्रजातंतुहोत्र

होत्रकगोचरं पशोरुपव्रतीयस्यविभागस्त्वथकथ्यते आश्वलायनः सत्रिणांधर्मेष्वेवमहा
सुस्मासुहविरुच्छिष्टमत्ताएवस्युर्धानाःकरंभःपरिवापःपुरोडाशःपयस्येति तेषांयद्यत्कामये
रंस्तत्तदुपविगुल्फयेयुरिति प्राणधारणाययथापर्याप्तिनेतथाहविःशेषस्याधिक्येनसंपाद
नमुपगुल्फनं एवंबहुविधान्हविःशेषान्भक्षानुक्त्वापुनरप्यंतएवमुवाच अपिवान्यत्रसिद्धंगा
र्हपत्येपुनरधिश्रित्योपस्तृतेयेरन्नन्यान्वापथ्यान्भक्षानामूलफलेभ्यएतेनवर्त्तयेयुः पशुनाचे
ति अन्यत्रसिद्धंगृहेपक्वमन्नंपुनरपिगार्हपत्येसकृदवस्थाप्योपस्तृतयेरन्नुपभुंजीरन् अन्या
न्वाल्लडुकमंडकादीन्भक्षान्पथ्यानजीर्णादिदोषरहितान्मूलपर्यंतंइच्छयास्वीकुर्यात् एतेनसु
स्मादिवेषुसंनिहितेनपशुनाचवर्त्तयेयुः जीवनरूपांवृत्तिंसंपादयेयुः इत्येवंसवनीयपशुरू
पस्यहविषःशेषभक्षणेनसत्रिणांजीवनमप्यभिहितं तस्मिन्पशौकस्यकोविभागइतिजिज्ञा

सायां तद्विभागकथनं प्रतिजानीते अथ अथ होतृहोत्रकशब्दनिर्णयानंतरं यतः शाखाद्यनुष्ठायिनां स
त्विजां जीवनोपायोपेक्षितः अतः कारणात् सवनीयस्य पशोर्विभक्तिः कथ्यते विभक्तशब्दस्यैव व्याख्या
नं तस्यैताह वक्ष्याम इति प्रतिज्ञातो यो विभागस्तं दर्शयति हनू जिह्वयासहितं हनुद्वयं प्रस्तोतुर्भागः
श्येनाकारवक्ष उद्गातुर्विभागः यः कंठः यस्य स काकुदः काकुदं तदुभयं प्रतिहर्तुर्विभागः श्रोणिः उ
रुमूलं तदुभयं दक्षिणसव्यभूयं क्रमेण होतुर्ब्रह्मणो विभागः ऊर्ध्वाधोभागसक्थि तच्चोभयक्रमेण
मैत्रावरुणब्राह्मणाच्छंसिनो विभागः दक्षिणांसेनयुक्तं दक्षिणपार्श्वकूर्ध्वयोर्भागः सव्यं पार्श्वपात्रं
उपगातॄणां भागः सव्यः अंसः प्रतिप्रस्थातुर्भागः दोर्बाहुः तच्चोभयं क्रमेण नेष्टुपोत्रोर्भागः उरुद्वयं
क्रमेणाच्छावाकाग्नीध्रयोर्भागः सक्थिशब्देन अधोभागस्याभिहितत्वात् उर्ध्वभाग ऊरुशब्देन वि
वक्षितो बाहुद्वयं क्रमेण आत्रेयसदस्ययोर्भागः दोर्बाहुशब्दयो रर्थैक्येप्यधोभागोर्ध्वभागाभ्यां भे

दो द्रष्टव्यः सदान्तकशब्दो पूर्वाचार्यैर्व्याख्यातो अनूकं मूत्रवास्तिः स्यात् साम्नेत्येके वदंति च सदंतुशब्दं
त्राः स्यादित गृहपतेर्द्वयमिति यः पुमान् गृहपतेर्व्रतप्रदो जनदायी तस्य दक्षिणो पादो भागः गृहपते
र्यानार्या तस्यैच व्रतप्रदो यः पुमान् तस्य सव्यो पादो भागः अत्र पुरोवर्त्तिनोः पादयोर्बाहुत्वेनाभिहि
तत्वात् पाश्चात्यावेव पादशब्देन विवक्षितौ तत्रैकस्मिन्नपि दक्षिणे पादे द्विवचनमवयवापेक्षं एवं
मुभिनत्तरत्रापियोयमोष्ठः सोयमनयोर्व्रतप्रदयोः साधारणो भागो भवति तं भागं गृहपतिरेव प्रविशेष्या
त्तवजयं तव अर्थ्यमिति विभज्य प्रदद्यात् जाघनी पुच्छं तां पत्नीस्यो हरं निरस्य कस्ताश्चपत्न्यः नाजाघ
नी ब्राह्मणाय कस्मैचित् दद्यात् स्कंधे नवाः स्कंध्याः मणिसदृशा मांसखंडा मणिकाः एकस्मिन् पा
र्श्वे स्थिता मांसशलाकास्तिस्रः कीकसाः मणिकाः कीकसाश्चेति उभयं यावस्तुतो भागः इतरपार्श्वे स्थि
तास्तिस्रः कीकसा अर्धे कर्त्तः श्रोटो मांसखंडः तस्यार्धं पूर्वोक्ति कीकसात्रयं चोत्रेतुर्भागः यत्त्वैकर्त्तस्येतर

दक्षं यस्य हृदयपार्श्ववर्ति क्लोमशब्दाभिधो मांसखंडः तदुभयं शमितुर्भागः अयं शमिता यद्य
२ ब्राह्मणः स्यात्तदा स्वेन स्वीकृतं तदुभयं अन्यस्मै ब्राह्मणाय दद्यात् यद्यब्राह्मणोऽस्ति तत्तु ब्रह्मण्यायैसु
ब्रह्मण्याभिधानर्त्विजे दद्यात् श्वःसुत्येति निगदनाम तावाग्नीध्रो ब्रूते तथा चाश्वलायन आह
आग्नीध्रः श्वःसुत्यां प्राहेति अजिनं चर्म तस्याग्नीध्रस्य भागः इलासवेनीयपशोः संबंधी यो यभि
तो भागः स सर्वेषां साधारणः यद्वा होतुरसाधारणः १ मूल तावाऽएताः षट्त्रिंशतमे
कपदा यज्ञं वहंति षट्त्रिंशदक्षरा वै बृहती बार्हताः स्वर्गा लोकाः प्राणांश्चैव तत्स्वर्गांश्च लोका
नाप्नुवंति प्राणेषु चैव तत्स्वर्गेषु च लोकेषु प्रतितिष्ठंतो यंति स एषः स्वर्ग्यः पशुर्य एनमेवं विभजंत्य २
थये · तोन्यथा तद्यथा सेलगाः वा पापकृतो वा पशुं विमथ्नीरंस्तादृक्तत्तां वाऽएतां पशोर्विभ-
क्तिं श्रौतः ऋषिर्देवभागो विदां चकार तामु हाप्रोच्यैवास्माल्लोकादुच्चक्राम तामु ह गिरिजाय बा

भ्रव्यायामनुष्यः प्रोवाच ततो हैनामेतदर्वाङ् मनुष्याऽधीयतेऽधीयते १ इति सप्तमपंचि-
कायां प्रथमोऽध्यायः १ भाष्य· उक्तानां पशुविभक्तीनां संख्यां प्रशंसति तावा तावेहवा
दयऽइलांताः श्रुत्याऽउक्ता अस्माभिरपि प्रदर्शपमानाः षट्त्रिंशतं षट्त्रिंशत्संख्याकाः एक
पदाः हनुजिह्वेसेवं एकैकेन पदेन अभिधीयमानाः पशुविभक्तयो यज्ञं वहंति यज्ञस्य निर्वाहं
कुर्वंति संख्या चेयं पूर्वाचार्यैर्व्याख्याता नात्र पादोषो नोद्भावन्यो। द्वात्रिंशदेव हि हन्वादि इलां
तमुक्तं ताः षट्त्रिंशद्विभक्तयः पशोरिति अतः संख्यासाम्यादियं विभक्तिः बृहतीरूपाः स्व
र्गलोकाश्च बृहत्या संपादयितुं शक्यत्वात् बार्हताः तत्तेन पशुविभागेन सत्त्रिणः प्राणान्
स्वर्गलोकानपि प्राप्नुवंति पश्ववयवानां प्राणधारत्वात् तेन विभागेन सत्रिणोऽस्मिन्नूर्जन्मनि प्रा
णेषु प्रतिष्ठिता वर्तिन जन्मांतरेषु बृहतीद्वारा स्वर्गेषु लोकेषु प्रतितिष्ठंतो वर्तंते प्रशुं प्रशंसति

४

सए येसत्रिणः एनंपशुएवमुक्तेनप्रकारेणविभक्तंकुर्वंतितेषांसत्रिणांसएषःपशुःस्वर्ग्यःस्वर्गा
यहितोभवति प्रकारांतरेणविभागंनिंदति अथ अथउक्तविभागप्रशंसानंतरंमितरनिंदोच्य
तइतिशेषः येसत्रिणःअतःपूर्वोक्तविभागादन्यथाप्रकारांतरेणविभजंतइत्यनुवर्त्ततेतत्तेषां
निदर्शनमुच्यते इत्याशयेनश्रन्नमुच्यतेतेनसहवर्त्ततइतिसेलंअन्नंअन्नवक्रुलोदेशात्संग
छंतीतिसेल्लगाः विहितकर्माननुष्ठायिनः केवलोदरपोषणपरायणाइत्यर्थः पापकृतःप्र
तिषिद्धकर्मकारिणः तेचद्विविधाःयथापशुंविभजंतीनन्केवलंमांसभक्षणार्थमेवहन्युःता
दृशेवतदन्यथाविभजनंद्रष्टव्यं उक्तंपशुविभागंतद्दृष्टमहर्षिद्वाराप्रशंसति नावा तामेतांपू
र्वोक्तांपशुविभक्तिंश्रुतनामकस्यमुनेःपुत्रोमहर्षिर्विदेहंचकारज्ञातवान् तामुहतामेनस्वेन
ज्ञातांविभक्तिंअप्रोच्यैवरहस्यविद्येतिमत्वाकस्मैचिदप्यप्रकथयित्वैवअस्माल्लोकादुच्चक्रा

४

[illegible]शः देशांतरेमृतस्यप्रेतस्यशरीरस्यअस्थ्यादिप्रेतावयवानां आहर्त्रो
आहरणपर्यंतमेनान् आहवनीयादीन्त्रीनग्नीन्अजस्रानुपशमरहितान् अजुह्व
तोहोमरहितानेवमेवअसमाप्तेमेवप्रकारेणइंधीरेन्प्रज्वालयेयुरितिहोमाभावेपित्रयोप्य
ग्नयोनोपशाम्यंति तथाप्रेतास्थिसमानयनपर्यंतप्रज्वालयेदित्यर्थः प्रेतास्थिविनाशेकिं
कर्त्तव्यमित्याशंक्याह यदि यदिकथंचित्शरीराणिअस्थ्यादीनिनविद्येरन्विनश्येयुः तदोप
णशरः पलाशवृक्षस्यछिन्नान्वृंतान्षष्ठ्युत्तरशतत्रयसंख्याकांनाहृत्यतेषांवृंतानांसंबंधि
पुरुषरूपकमिवकृत्वामनुष्यसदृशंकिंचिद्रूपंनिर्माययतस्मिन्रूपेतामाहृतंप्रेतशरीरोचितंप्रका
रंदहनपिंडदानादिरूपंकुर्युः अथतदानींकृत्रिमरूपदहनकालेएनानाहवनीयाद्यग्नीन्श्म
शानेनीत्वासमाहृतैस्तैःपलाशवृंतनिर्मितैःशरीरावयवैःसंस्कृतरूपंसंसृष्टंकृत्वोद्वासयेयुः १

5

७

पुरुषस्वरूपनिर्माणंप्रकारंदर्शयति मूल ध्यर्द्धशतंकायेस्य विप्लुनीहिपंचाशच्चविंशोचोरू
ह्रिपंचविंशो शेषंतु शिरस्युपरिदध्यात्सा तत्र प्रायश्चित्तिः २ तदाहुर्यस्याग्निहोत्रमुपावसृष्टा
दुह्यमानोपविशेत्का तत्र प्रायश्चित्तिरितितामभिमंत्रयेत यस्माद्भीषानिषीदसि ततो नोऽभयं
कृधि पशून्नस्सर्वान्गोपाय नमो रुद्राय मीढुष इतितामुत्थापयेदुदस्थाद्देव्यदितिरायुर्यज्ञप
तावधात् इंद्राय कृण्वती भागं मित्राय वरुणाय चेत्यथास्याउदपात्रमूधसि च मुखे चोपगृह्णीया
दथैनां ब्राह्मणाय दद्यात्सा तत्र प्रायश्चित्तिस्तदाहुर्यस्याग्निहोत्रमुपावसृष्टा दुह्यमाना वा।
श्येतका तत्र प्रायश्चित्तिरित्यशनायाह वाऽएषा यजमानस्य प्रतिख्याय वाश्यते तामन्नम
स्याद्येच्छां त्स्ये शांतिर्वाऽअन्नं सूयवसाद्भगवती हि भूया इति सा तत्र प्रायश्चित्तिस्तदाहुर्यस्या
ग्निहोत्रमुपावसृष्टा दुह्यमाना स्पंदेत का तत्र प्रायश्चित्तिरिति सा यत्तत्र स्कंदयेत्तदभिमृश्य ज

७

पेद्यदद्य दुग्धं पृथिवीमसृप्त यदोषधीरत्यसृपद्यदापः पयो गृहेषु पयोऽघ्न्यायां पयो वत्सेषु
पयोऽअस्तु तन्मयीति तत्र यत्परिशिष्टं स्यात्तेन जुहुयाद्यद्यलं होमाय स्याद्यद्यु वै सर्वं सिक्तं स्या
दथान्यामाहूय तां दुग्ध्वा तेन जुहुयादा त्वेव श्रद्धायै होतव्यं सा तत्र प्रायश्चित्तिः २ तदाहुर्यस्य सा
यं दुग्धं सान्नाय्यं दुष्येद्वापहरेद्वा का तत्र प्रायश्चित्तिरिति [illegible] स्थाने नि
[illegible] तिप्रातर्दुग्धं द्वैधं कृत्वा तस्यान्यतरां चक्रिमातच्यतेन यजेत सा
तत्र प्रायश्चित्तिस्तदाहुर्यस्य प्रातर्दुग्धं सान्नाय्यं दुष्येद्वापहरेद्वा का तत्र प्रायश्चित्तिरित्यैंद्रं वामा
हेंद्रं वा पुरोडाशं तस्य स्थाने निरूप्य तेन यजेत सा तत्र प्रायश्चित्तिस्तदाहुर्यस्य सर्वमेव सान्नाय्यं
दुष्येद्वापहरेद्वा का तत्र प्रायश्चित्तिरित्यैंद्रं वा माहेंद्रं वेति समानं सा तत्र प्रायश्चित्तिस्तदाहुर्यस्य स
र्वाण्येव हवींषि दुष्येयुर्वाऽपहरेयुर्वा का तत्र प्रायश्चित्तिरित्याज्यस्यैनानि यथादेवतं परिकल्प्य त

८

याज्यहविषेष्ट्वा यजेतातोन्यामिष्टिमनुल्वणांतन्वीत यज्ञो यज्ञस्य प्रायश्चित्तिः २ ४ मा
ष्यः अध्य आनीतानां पत्नीशाद्वृंतानामंध्यर्धशतमधिकेनार्द्धेन पंचाशद्रूपेण युक्तं शतं
कायेमध्यशरीरस्थाने दध्यात्परितः प्रक्षिपेत् पंचाशत्संख्याकानां वृंतानां समूहरूपं पंचा
शद्विसंख्याके द्विपंचाशे विंशतिसंख्याकानां समूहरूपं विंशद्विपंचाशेभ्यविंशश्च सप्त्यनीर
ध्यात् चत्वारिंशदधिकेन शतेन सक्थिद्वयं निष्पादयेदित्यर्थः पंचविंशतिसंख्याकानां स
मूहरूपं पंचविंशद्विसंख्याके पंचविंशे तेऊरुद्वयं दध्यात् पंचाशत्संख्याकैर्वृंतैरूरुद्वयं निष्पा
दयेदित्यर्थः एवं नवत्यधिकशतद्वये गते सति शेषं सप्ततिसंख्याकं शिरस्युपरि प्र
क्षिपेत् प्रवसतो मृतस्याग्निहोत्रवैकल्ये प्रायश्चित्तं निगमयति सातत्रप्राय

८

८

साप्रोक्तत्रियातत्रवैकल्ये प्रायश्चित्तिसमाधानुकरणं इति द्वात्रिंशोध्याये प्रथमः खंडः पंच
मे प्रश्नोत्तरे दर्शयति तदा अग्निहोत्रहविर्थे दोग्धव्या धेनुरग्निहोत्री यस्याग्निहोत्रिणः संबं
धिनी सा धेनुः उपावसृष्टा वत्सेन संयोजिता दुह्यमाना सती दोहनस्य विघ्नं कृत्वा यत्युपविशे
त् तदानीं वक्ष्यमाणेन मंत्रेण तामभिमंत्रयेत यद्यप्येतत्पंचविंशाध्यायस्य द्वितीयखंडे वर्णितं त
थापि तत्र बुद्धिस्थसंगतिः अत्र तु प्रायश्चित्तप्राधान्येनोपक्रमात्साद्दादैवसंगतमित्यभिप्रेत्य पु
नरप्याम्नातं तत्रोत्तरशेषं दर्शयति यस्या एतत्सर्वं पूर्वन्नैव व्याख्यातं षष्टे प्रश्नोत्तरे दर्शय
ति तदा एतदपि पूर्वत्र व्याख्यातं सप्तमे प्रश्नोत्तरे दर्शयति तदा एतदपि पूर्वत्र व्याख्यातं इ
ति द्वात्रिंशोध्याये द्वितीयः खंडः अष्टमे प्रश्नोत्तरे दर्शयति तदा दर्शपूर्णमासयोरध्यर्थं सायं
काले दुग्धं पयः सान्नाय्यरूपं केशाकीटादिभिर्दुष्येत् याकश्चिदपहरेद्वा तदानीं परेद्युः प्रात

९

दुग्धं पयोभागद्वयं कृत्वा तत्रैकस्तागमातच्यते न संस्कृत्य दधिस्थानीयेन तेन यजेत नवमे प्रश्नोत्तरे
दर्शयति तदाशातदुग्धरूपस्य सान्नाय्यस्य दोषापहाराभ्यावैकल्ये सति तस्य दुग्धस्य स्थाने इंद्रदेव
ताकं महेंद्रदेवताकं वा पुरोडाशं कृत्वा तेन यजेत इंद्रयाजि महेंद्रयाजि देवताभेदो व्यवस्था दशमे प्र
श्नोत्तरे दर्शयति तदा सायंदुग्धं प्रातर्दुग्धं चेत्युभयं सर्व एकादशे प्रश्नोत्तरे दर्शयति तदा पुरोडाश
दधिपयोरूपाणि हवींषि सर्वाणि दुष्टानि आज्यस्य संबंधीन्येतानि त्रीणि हवींषि तत्तद्देवतानामनति
क्रम्य तदनुसारेण परिकल्प्याज्यहविर्युक्त तया तयेष्ट्या यजेत दृष्टा च तत्तदूर्ध्वमन्यामिष्टिमनुल्व-
णामनूनानधिकां यथाशास्त्रं तन्वीत विस्तारयेत् यथाशास्त्रमनुष्ठितो यज्ञः पूर्वस्य विकलस्य
यज्ञस्य प्रायश्चित्तिः इति द्वाविंशोध्याये तृतीयः खंडः २ मूल तदा कुर्यस्याग्निहोत्रमधिश्रित
ममेध्यमापद्येत का तत्र प्रायश्चित्तिरिति सर्वमेवैनत्स्रुच्याभिपर्यासिच्य प्राङुदेत्याहवनीये हैतां स

९

मिधमभ्यादधात्यथोत्तरत आहवनीयोस्य्रंभस्मनिरूह्य जुहुयान्मनसा वा प्राजापत्यया वर्चा नहुतं वा कु
तं च स यद्येकस्मिन्नुन्नीते यदि द्वयोरेष एव कल्पः सत्त्वे व्यपनयितुं शक्नुयाद्भिः सिंचेत दुष्टमदुष्टमभि
पर्यासिच्य तस्य यथोन्नीतीस्यात्तथा जुहुयात् स्मात तत्र प्रायश्चित्तिः तदा कुर्यस्याग्निहोत्रमधिश्रितं स्कंद
ति वा विष्यंदते वा का तत्र प्रायश्चित्तिरिति तदद्भिरुपनिनयेच्छांत्यै शांतिर्वा आपो थैनद्दक्षिणेन पाणि-
नाभिमृश्य जपति दिवं तृतीयं देवान्यज्ञोगात्ततो मा द्रविणमाष्टांतरिक्षं तृतीयं पितॄन्यज्ञोगात्ततो मा द्र
विणमाष्ट पृथिवीं तृतीयं मनुष्यान्यज्ञोगात्ततो मा द्रविणमाष्ट पयोरोजसा स्कभिता रजांसीति वैष्णुवारु
णीमृचं जपति विष्णुर्वै यज्ञस्य दुरिष्टं पाति वरुणः स्विष्टं तयोरुभयोरिव शांत्यै ३ भाष्य. द्वादशे प्र
श्नोत्तरे दर्शयति तदा अग्निहोत्रार्थं पयो गार्हपत्ये पाकार्थं यदधिश्रितं तद्यदि किंचिदमेध्यं यज्ञानर्हं
केशकीटादिकमापद्यत प्राप्नुयात् तदानीमेतद्धविः सर्वमेतदग्निहोत्रहवण्यां स्रुचि सा कल्पेन सिक्त्वा

प्राङ्मुखउदेत्योत्थायाहवनीयंप्रतिगत्वा तस्मिन्नेतानिनित्यां समिधमादध्यात् अथानंतरमाहव
नीयस्योत्तरभागे किंचिद्दुष्टं नस्मन्तोनिःसार्यंतस्मिन्न नस्मानित्याग्निहोत्रेमंत्र मनुस्मृत्यवाचावाप्र
जापतेनत्वदेतानिति मंत्रमुच्चार्य जुहुयात्तदेतान्नीतिमंत्रमुच्चार्य जुहुयात्तदेतद्भस्मउष्मत्वाहुतम
पि भवति अग्निराहितास्यहुतमपि भवति न केवलमधिश्रितएवामेध्यपातएतस्यायश्चित्तं किंत
र्हि चतुरुन्नयनावस्थायांयद्येकस्मिन्नुन्नीतेयदिवाद्वयोरुन्नीतयोरमेध्यपातस्तदानीमेषएवक
ल्पः प्रकारः उन्नयनंनामाग्निहोत्रहत्रहवण्यांसेचनं तत्केशकीटादिदूषितमग्निहोत्रहवण्यामु
न्नीतंयद्यपनेतुंशक्नुयात् तदानीमेतत्दुष्टं निःषिच्य निःसार्यंस्थाल्यामवस्थितमदुष्टंक्षीरमग्नि
होत्रहवण्यामभिपर्यासिञ्चयद्योन्नीतीस्यात् उन्नीतीयेनप्रकारेणभवति तेनप्रकारेणजुहुयात्
अदुष्टद्रव्यांतरमधिश्रयणादिना संस्कृत्य जुहुयादित्यर्थः त्रयोदशोप्रश्नोत्तरे दर्शयति तदाअग्नि

होत्रद्रव्यंगार्हपत्येपाकार्थमधिश्रितं सत्कदाचित्स्कंदति स्खलति क्षीरबिंदुरधः पततीत्यर्थः विष्यंदते
विशेषेणस्पंदनं दशाहाधिक्येन स्थालीमुखस्योपरि उद्गमनं तत्स्कन्नं विष्यंदितं वा द्रव्यं दक्षिणेनपा
णिनास्पृष्ट्वावक्ष्यमाणंमंत्रंजपेत् तद अस्यस्कन्नस्यनिष्यंदितस्यवापयसस्तृतीयमंशःस्वरूपंदि
वंस्वर्गलोकमगात् प्राप्नोतु तेनयज्ञोपिदेवान्प्राप्नोतु प्रापणाद्वैकल्पपरिहारेसति मामग्निहोत्रिणं
द्रविणमाष्टधनंप्राप्नोतु तथैवापरंतृतीयंद्रव्यांशस्वरूपमंतरिक्षमगात् तेनयज्ञोपिपितॄन्प्राप्नोति
ततः प्रापणान्मांधनंप्राप्नोतु पुनरप्यपरं तृतीयद्रव्यांशः स्वरूपं पृथिवीमगात् तेनयज्ञोपिमनुष्या
नगात् तस्मादुभयप्रापणान्मांद्रविणंधनंमाष्टप्राप्नोतु मंत्रांतरंजपंविधत्ते पयो पयारोजसे
त्याद्यृक्सूत्रेपठिता तस्याश्चतुर्थपादे विष्णुअगन्न् वरुणापूर्वहूताविति श्रुतत्वादियंविष्णुवरुणदे
वताकायज्ञस्यपयहुरिष्टमंगतेकल्पंतक्षमयित्वाविष्णुःपातियज्ञस्यपयत्स्विष्टंयथाशास्त्रमनुष्ठितमंग

११

तद्द्वरूणः पातिफलप्रतिषेधनिवारणं तत्स्तुतिपालनं तस्मादयंजयः तयोरूनयोर्दुरिष्टस्विष्ट
योर्यथोक्तप्रकारेणशांत्यर्थं संपद्यते ॥ उत्तरवाक्यमुपसंहरति स्मात चतुर्दशोपश्नोत्तरेदर्शयि
ति तदा अग्निहोत्रद्रव्यं गार्हपत्येधिश्रितं पाकादूर्ध्वमादायप्राङ्मुखआहवनीयंप्रत्युदायन्नुत्जुह्व
न् अध्वर्युर्यदा भवति तदानीतद्रव्यं स्खलेत यद्यत्रैशातविंदुपतनं स्खलनं साकल्येनद्रव्यपतनंभ्रं
शः पुनरप्यग्निहोत्रस्थाल्याद्रव्यं गृहीतुः सोध्वर्युर्यदिपश्चिमाभिमुखोनिवृत्तोभवेत् तदानींस्व
र्गप्राप्तंयजमानं तस्माल्लोकादावर्त्तयेत् अतोनिवृत्तिमकृत्वा स्खलनप्रदेशादेवोपविष्टा-
स्मा ऽ अध्वर्यवे स्थालीगतमग्निहोत्रद्रव्यशेषमन्येपुरुषाः आहरेयुः तस्यद्रव्यस्य स्वीकारे
णाध्वर्युर्योन्नीतीस्यात् तथाजुहुयात् उन्नीतं उन्नयनं स्थालीगतस्यद्रव्यस्याग्निहोत्रहव
ण्यां चतुर्वारं प्रक्षेपः चतुरुन्नन्नीतीश्रुतत्वात् उन्नयनादिसंस्कारपूर्वकंजुहुयादित्यर्थः

११

पंचदशोपश्नोत्तरेदर्शयति तदाकुरथ्ययदिस्रुग्भिद्येतकातत्रप्रायश्चित्तिरित्यन्यांस्रुचमाहृत्य
जुहुयाद्ध्येतांस्रुचंभिन्नामाहवनीयेभ्योदध्यात्साग्रंडांप्रस्व ८ क्पुष्करां सातत्रप्रायश्चित्तिरिति
स्रुगग्निहोत्रहवणी तद्भेदे स्रुगंतरेणकृत्वा भिन्नांस्रुचमाहवनी येप्रक्षिपेत् तदानींतदीयोदं
डः प्राच्यामवस्थितः तदीयंपुष्करं बिलंप्रतीच्यामवस्थितं यथाभवति तथाप्रक्षिपेत् इतिद्वा
त्रिंशोध्याये चतुर्थः खंडः षोडशोपश्नोत्तरेदर्शयति तदा प्रतिदिनमाहवनीयाग्निर्होमादूर्ध्व
मुपशाम्यति गार्हपत्याग्निस्तुसर्वदाधार्यते तस्माद्गार्हपत्यात्तत्तद्धोमकाले आहवनीयार्थमेग्निं
विहरेदित्येषोनुष्ठानक्रमः एवंसतियदिकदाचिदाहवनीयस्थानेग्निरनुपशांतो विधेततदा
नीगार्हपत्यश्चोपशाम्येत ४ मूल ४ एकादशांकपुटपत्रस्यद्वितीयपंक्तौप्रथमतोमूलंवाच
नीयं ४ सातत्रप्रायश्चित्तिस्तदाकुर्यस्याग्निहोत्रमधिश्रितंप्राङुदायन्स्खलतेवापिवाश्रंश

10

१२

नेकातत्रप्रायश्चित्तिरितिसयद्युपनिवर्त्तयेत्स्वर्गाल्लोकाद्यजमानमावर्त्तयेदेवं वास्माऽउपविश्यैवे
तमग्निहोत्रपरीशेषमाहरेयुस्तस्ययथोन्नीतीस्यात्तथाजुहुयात्सातत्रप्रायश्चित्तिस्तदाहुरथ
यदिस्रुग्भिद्येतकातत्रप्रायश्चित्तिरित्यन्यांस्रुचमादायजुहुयाद्दथेतांस्रुचंभिन्नामाहवनीयेभ्यो
दध्यात्स्याग्दंडांग्रस्यकुष्ठरांसातत्रप्रायश्चित्तिस्तदाहुर्यस्याहवनीयेहाग्निर्विद्येताथगार्हपत्य
उपशाम्येत्कातत्रप्रायश्चित्तिरितिसयदिप्रांचमुद्धरेत्प्रायतनाच्च्यवेतयत्सत्पंचमसुरवध्यं
तन्वीतयन्मंथेज्जातव्यंयजमानस्यजनयेद्यदनुगमयेत्प्राणोयजमानंजह्यात्सर्वमेवेनंसहभ
स्मानंसमोथगार्हपत्यायतनेनिधायाथप्रांचमाहवनीयमुद्धरेत्सातत्रप्रायश्चित्तिः ५ स्तदा
हुर्यस्याग्नावग्निमुद्धरेयुःकातत्रप्रायश्चित्तिरितिसयद्यनुपत्रेपद्धदृष्टपूर्वमपरंनिदध्याद्यदि
नानुपत्रेपत्सोग्नयेग्निवतेष्टाकपालंपुरोळाशंनिर्वपेत्तस्ययाज्यानुवाक्येअग्निनाग्निःसमिध्य

१२

नेत्वंह्यग्नेऽअग्निनेत्याहुतिंवाहवनीयेजुहुयादग्नयेग्निवतेस्वाहेतिसातत्रप्रायश्चित्तिः ६
भाष्य तत्रतस्यैवेकल्पस्यपरिहारायपक्षाःपंचविधाःसंभवंतिविद्यमानमाहवनीयंगार्हप
त्यतयासंभाव्यततोपिपूर्वदेशेआहवनीयंकर्त्तुतस्मात्पूर्वसिद्धाहवनीयात्प्रांचमग्निमुद्धरेदिति
प्रथमःपक्षः तस्मिन्पक्षेयजमानआयतनात्स्वकीयस्थानाच्च्यवेताहवनीयस्थानात्प्रच्युत
त्वात् अथगार्हपत्यार्थंपूर्वसिद्धादाहवनीयात्सत्पंचमग्निमुद्धरेदितिद्वितीयःपक्षः अस्मिन्
द्वितीयपक्षेयज्ञएषोसुरयज्ञेसमानंस्यात् असुरयज्ञश्चशाखांतरेतानसुरान्स्वकृते[illegible]माम्नीयते
तआहवनीयमंथआदधत अथगार्हपत्यमथान्वाहार्यपचनमितितदीयदोषोपितत्रैवा
म्नातः तद्राभूतीपरानविष्यामितिगार्हपत्यार्थमग्निमथनंकर्त्तव्यमितितृतीयःपक्षःतदा
नीविद्यमानओहवनीयेतद्विरोधितोग्नेतरस्यमथनाद्यस्यशत्रुमुत्पादयेत् पुनराधानेक

(१८)

त्तौ विद्यमानमाहवनीयमनुगमयेत् उपव्रामयेदितिचतुर्थः पक्षः तस्मिन्पक्षे विद्यमानस्यावि
नीताग्नास्माणो यजमानं परित्यजेत् आहवनीयगतं भस्मसहितं सर्वमप्यग्निं कस्मिंश्चित्पात्रे प्र
क्षिप्यनीत्वा गार्हपत्यस्थाने प्रक्षिप्यानंतरं ततो गार्हपत्यात्त्वां च माहवनीयमुद्धरेदिति पंचमः प
क्षः अस्मिन्पक्षे दोषाभावात्सैव प्रायश्चित्तिर्भवति सप्तदशोपक्षो नंतरे दर्शयति तदा सायंप्रात
राहवनीये ग्नोस्थित एव सति पुनरपि गार्हपत्याग्निं यउद्धरेयुस्तदानीमुद्धृतस्याग्नेः प्रक्षेपात्पूर्व
मेव विद्यमानस्याग्नेर्दर्शने तं पूर्वविद्यमानमग्निमुद्धृत्यतस्मादाहवनीयस्थानादुद्धृत्य तस्मिन्
स्थाने पुनरपरमिदानीमानीतमग्निं निदध्यात् यद्येदि तु विद्यमानं नानुपश्येत्तदानीमानीता
मग्निं तत्र प्रक्षिप्य पश्चादग्निद्वयमवगत्याग्निवते ग्नये देवताये पुरोडाशं निरूप्य तस्यैते याज्या २४
नुवाक्ये कुर्यात् अग्निनाग्निरितिपुरोनुवाक्यात्वं ह्यग्ने अग्निनेति याज्या सो यमेकः पक्षः •

दर्विहोमवद्याज्यानुवाक्ये परित्यज्याग्नयेग्निवते स्वाहेति मंत्रेणाहवनीय आज्यं जुहुयादि
ति द्वितीयः पक्षः ४ मूल. तदा कुर्यस्य गार्हपत्याहवनीयौ मिथः संसृज्येयातां का तत्र प्राय
श्चित्तिरिति सोग्नये वीतये ष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये ऽग्न आयाहि वी
तये यो ऽग्निं देववीतय ऽइत्याहुतिं वाहवनीये जुहुयादग्नये वीतये स्वाहेति सा तत्र प्राय
श्चित्तिस्तदा कुर्यस्य सर्व एवाग्नयो मिथः संसृज्येरन्का तत्र प्रायश्चित्तिरिति सोग्नये विविच
येष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये स्वर्ण वस्तोरुष सामरोचि त्वामग्ने मानुषी
रीलते विशाइत्याहुतिं वाहवनीये जुहुयादग्नये विविचये स्वाहेति सा तत्र प्रायश्चित्तिस्तदा
कुर्यस्याग्नयो न्यैरग्निभिः संसृज्येरन्का तत्र प्रायश्चित्तिरिति सो ग्नये क्षामवते ष्टाकपालं पु
रोडाशं निर्वपेत्तस्य याज्यानुवाक्ये ऽक्रंददग्निः स्तनयन्निव द्यौर धाय यथा नः पितरः परास

इत्याहुतिंवाहवनीयेजुहुयादग्नयेक्षामवतेस्वाहेतिसातत्रप्रायश्चित्तिस्तदाकुर्यस्याग्नयोग्रा
म्येणाग्निनासंदह्येरन्कातत्रप्रायश्चित्तिरितिसोग्नयेसंवर्गायाष्टाकपालंपुरोलाशंनिर्वपे
२४ त्तस्ययाज्यानुवाक्ये कुविन्सुनोगविष्टयेमानोऽस्मिन्महाधन इत्याहुतिंवाहवनीयेजु
हुयादग्नयेसंवर्गाय स्वाहेति सातत्रप्रायश्चित्तिस्तदाकुर्यस्याग्नयो दिव्येनाग्नि
नासंसृज्येरन्कातत्रप्रायश्चित्तिरितिसोग्नयेशुमतेष्टाकपालंपुरोलाशंनिर्वपेत्त।
स्ययाज्यानुवाक्येऽअग्ने शुगग्ने सधिष्ठवमयो दधे मेधिरः पूतदक्षऽइत्याहुतिंवाहव
नीयेजुहुयादग्नयेशुमतेस्वाहेतिसातत्रप्रायश्चित्तिस्तदाकुर्यस्याग्नयः शावाग्निना २४
संसृज्येरन्कातत्रप्रायश्चित्तिरितिसोग्नयेशुचयेष्टाकपालंपुरोडाशंनिर्वपेत्त
स्ययाज्यानुवाक्येऽअग्निः शुचिव्रततमःऽउदग्नेशुचयस्तवेत्याहुतिंवाहवनीये।

जुहुयादग्नयेशुचयेस्वाहेतिसातत्रप्रायश्चित्तिस्तदाकुर्यस्याग्नयः आरण्येनाग्निनासंदह्येर
न्कातत्रप्रायश्चित्तिरितिसमेवारोपयेदरण्योर्वोल्मुकंवामोहयेयद्याहवनीयाद्यदिगार्हपत्या
द्यदिनशक्नुयात्सोग्नयेसंवर्गायाष्टाकपालंपुरोलाशंनिर्वपेत्तस्योक्तेयाज्यानुवाक्येऽआ
हुतिंवाहवनीयेजुहुयादग्नयेसंवर्गायस्वाहेतिसातत्रप्रायश्चित्तिः भाष्यः अष्टादशो
प्रश्नोत्तरेदर्शयति तदा अग्न्युद्धरणाद्ध्वंव्यवस्थितयोराहवनीयगार्हपत्ययोः सतोर्यदि
गार्हपत्यगतोंगारआहवनीयेप्रमादात्पतेत् आहवनीयगतोवागार्हपत्येपतेत् सोयंमिथ
:संसर्गः तत्रप्रायश्चित्तार्थस्यपुरोडाशस्यवीतिगुणयुक्तोग्निर्देवता अन्यत्पूर्ववद्व्याख्येयं
एकोनविंशोप्रश्नोत्तरेदर्शयति तदा आहवनीयगार्हपत्यदक्षिणाग्नीनांसर्वेषांपरस्पर
संसर्गेसतिविविचियुक्तोग्निः पुरोडाशदेवता अन्यत्पूर्ववद्व्याख्येयं विंशोप्रश्नोत्तरेदर्शं

(13)

२५

यदि तदा यस्याग्निहोत्रिणः संबंधिन आहवनीयाद्यग्नयोस्तदीयैराहवनीयादिभिर्लौकि
काग्निभिर्वा संसृज्येरन् तस्य प्रायश्चित्तार्थं पुरोडाशः क्षामवद्गुणयुक्तोऽग्निर्देवता अन्यत्पूर्व
वद्व्याख्येयं इति द्वात्रिंशोऽध्याये पंचमः खंडः एकविंशोऽध्यायान्तरे दर्शयति तदा यस्याग्नि
र्महानसादिगतः सकृदाचित्त्वमार्दनप्रवृत्तो ग्रामगतानि गृहाणि दहन्नग्निहोत्रशालाग
तानाहवनीयादीनग्नीन् सम्पद्दहति तदानीं प्रायश्चित्तस्य पुरोडाशस्य संवर्गगुणयुक्तो
ऽग्निर्देवता अन्यत्पूर्ववत् द्वाविंशोऽध्यायान्तरे दर्शयति तदा दिव्याग्निर्वैद्युतः अशनिपा
ते सति तदीयेनाग्निनाहवनीयादीनां संसर्गे प्रायश्चित्तपुरोडाशस्याप्सुमानग्निर्देवता
अन्यत्पूर्ववत् त्रयोविंशोऽध्यायान्तरे दर्शयति तदा प्रेतदहनाय प्रवृत्तोऽग्निः शावाग्निः तत्सं
सर्गे पुरोडाशस्य शुचिगुणयुक्तोऽग्निर्देवता अन्यत्पूर्ववद्व्याख्येयं चतुर्विंशोऽध्यायान्तरे

२५

दर्शयति तदा दावाग्निररण्यादागत्याग्निहोत्रशालां दहन्नाहवनीयादीन् यदा सम्प्रदह
ति तदानीं तद्दहनात्पूर्वमेवाग्नीन् अरणीद्वयोरप्येः सह समारोपयेदेवा तदशक्तो गार्हप
त्याहवनीयादुल्मुकं मोक्षयेत् सहसोल्मुकं आदाय परितो गच्छेत् समारोपणं वोल्मुकमो
चनं वेति पक्षद्वयस्याग्निदाहत्वरणपरानुशक्तिः तदा संवर्गगुणयुक्तोऽग्निः पुरोडाशदेव
ता तदीययाज्यानुवाक्ये च पूर्वमेवाग्निहिते इति द्वात्रिंशोऽध्याये षष्ठः खंडः ५ मूलं: त
दाकुर्य आहिताग्निरुपवसथे स्रुकुर्वीत कातत्र प्रायश्चित्तिरिति सोऽग्नये व्रतभृतेऽष्टाक
पालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये त्वमग्ने व्रतभृच्छुचिर्व्रतानि बिभ्रद्व्रतया अद
ब्धः इत्याहुतिं वाहवनीये जुहुयादग्नये व्रतभृते स्वाहेति सा तत्र प्रायश्चित्तिस्तदाकुर्य
आहिताग्निरुपवसथे व्रत्यमापद्येत का तत्र प्रायश्चित्तिरिति सोऽग्नये व्रतपतयेऽष्टाकपा

१६

लंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येत्वमग्नेव्रतपाऽअसियह्वोवयंप्रमिनामव्रतानीत्या
हुतिंवाहवनीयेजुहुयादग्नयेव्रतपतयेस्वाहेतिसातत्रप्रायश्चित्तिस्तदाकुर्यऽआहिता
ग्निरमावास्यांपौर्णमासींवातीयात्कातत्रप्रायश्चित्तिरितिसोग्नयेपथिकृतेष्टाकपालंपु
रोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येवेत्थाहिवेधोऽअध्वनःऽआदेवानामपिपंथामगन्मेत्याहु
तिंवाहवनीयेजुहुयादग्नयेपथिकृतेस्वाहेतिसातत्रप्रायश्चित्तिस्तदाकुर्यस्यसर्वऽएवा
ग्नयःऽउपशाम्येरन्कातत्रप्रायश्चित्तिरितिसोग्नयेतपस्वतेजनद्वतेपावकवतेष्टाकपा
लंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येऽआयाहितपसाजनेष्वानोयाहितपसाजनेषि १६
त्याहुतिंवाहवनीयेजुहुयादग्नयेतपस्वतेजनद्वतेपावकवतेस्वाहेतिसातत्रप्रायश्चि
त्तिः ७ तदाकुर्यआहिताग्निराग्नयणेनानिष्ट्वानवान्नंप्राश्नीयात्कातत्रप्रायश्चित्तिरि

तिसोग्नयेवैश्वानरायद्वादशकपालंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येवैश्वानरोऽअजीज
नत् पृष्टोदिविपृष्टोऽअग्निःपृथिव्यामित्याहुतिंवाहवनीयेनजुहुयादग्नयेवैश्वानरा
यस्वाहेतिसातत्रप्रायश्चित्तिस्तदाकुर्यऽआहिताग्निर्यदिकपालंनश्येत्कातत्रप्राय
श्चित्तिरितिसोश्विभ्यांद्विकपालंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येऽअश्विनावर्तिरस्म
दागोमतानासत्यारथेनेत्याहुतिंवाहनीयेजुहुयादश्विभ्यांस्वाहेतिसातत्रप्रायश्चित्ति
स्तदाकुर्यःआहिताग्निर्यदिपवित्रंनश्येत्कातत्रप्रायश्चित्तिरितिसोग्नयेपवित्रवतेष्टा
कपालंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येपवित्रंतेविततंब्रह्मणस्पतेतपोष्पवित्रंवि
ततंदिवस्पदइत्याहुतिंवाहवनीयेजुहुयादग्नयेपवित्रवतेस्वाहेतिसातत्रप्रायश्चित्ति
स्तदाकुर्यआहिताग्निर्यदिहिरण्यंनश्येत्कातत्रप्रायश्चित्तिरितिसोग्नयेहिरण्यपतेष्टा

१७

कपालंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येहिरण्यकेशोरजसोविसारऽआतेसुपर्णाऽ
अग्निनंतंएवैरित्याहुतीवाहवनीयेजुहुयादग्नयेहिरण्यवतेस्वाहेतिसातत्रप्रायश्चित्ति
स्तदाकुर्यःऽआहिताग्निर्यदिप्रातरस्नातोग्निहोत्रंजुहुयात्कातत्रप्रायश्चित्तिरितिसोग्न
येवरुणायाष्टाकपालंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येत्वंनोऽअग्नेवरुणस्यविद्वा
न्सत्वंनोऽअग्नेवमोअवोतीत्याहुतिंवाहवनीयेजुहुयादग्नयेवरुणायस्वाहेतिसातत्रप्राय
श्चित्तिस्तदाकुर्यःऽआहिताग्निर्यदिसूतकान्नंप्राश्नीयात्कातत्रप्रायश्चित्तिरितिसोग्नयेतं
तुमतेष्टाकपालंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येतंतुंतन्वन्रजसोभानुमन्विह्यच्छान
होनह्यतनोतसोम्याऽइत्याहुतिंवाहवनीयेजुहुयादग्नयेतंतुमतेस्वाहेतिसातत्रप्रायश्चि
त्तिः ६ भाष्यः पंचविंशोपस्मोत्तरेदर्शयतितदा उपवसथेयजनीयदिनात्पूर्वदिनेशिरो

१७

व्यथादिनाभृतबंधस्मरणादिनावानेत्रयोरश्रुमोचनेपुरोडाशस्यव्रतभृतगुणकोग्निर्दे
वता त्वमग्नेव्रतभृदित्यादिकेसूत्रकारेणपठिते षट्त्रिंशोपस्मोत्तरेदर्शयतितदा व्रतवि
रुद्धनिषिद्धाचरणमव्रत्यंदिवास्वापादिकमापद्येतप्राप्नुयात् तत्रव्रतपतिगुणयुक्तोग्निः
पुरोडाशदेवता सप्तविंशोपस्मोत्तरेदर्शयतितदा आहिताग्निरमावास्येष्टिंपौर्णमासेष्टिंवा
यदिकदाचिदतिक्रामेत्तदापथिकृद्गुणयुक्तोग्निःपुरोडाशदेवता अष्टाविंशोपस्मोत्तरे
दर्शयति तदा आहवनीयगार्हपत्यदक्षिणाग्नीनांसर्वेषामुपशांतौतपस्वकनद्दत्या
वकवद्गुणत्रययुक्तोग्निःपुरोडाशदेवता इतित्रिंशोध्यायेसप्तमःखंडः एकोनत्रिंशोप
स्मोत्तरेदर्शयतितदा गृहेषुनवधान्येसमागतेसत्याग्रयणेष्टिंकृत्वापश्चान्नवान्नंभोक्त
व्यं तस्मादृष्टेरकरणेवैश्वानरगुणयुक्तोग्निःपुरोडाशदेवता त्रिंशोपस्मोत्तरेदर्शयतित

दा आहिताग्नेः पवित्रनाशे पवित्रवद्गुणयुक्तोऽग्निः पुरोडाशदेवता द्वात्रिंशः प्रश्नोत्तरे दर्शी
यति तदा आहिताग्नेर्हिरण्यनाशे हिरण्यवद्गुणयुक्तोऽग्निः पुरोडाशदेवता त्रयस्त्रिंशः प्र
१८ श्नोत्तरे दर्शयति तदा आहिताग्नेः स्नानामनरक्षाग्निहोमे वरुणगुणकोऽग्निः पुरोडाश
देवता चतुस्त्रिंशः प्रश्नोत्तरे दर्शयति तदा आहिताग्नेः सूतकान्नप्राशने तंतुमद्गुणकोऽ
ग्निर्देवता ६ मूलं स्तदा कुर्यात् आहिताग्निर्जीवेम्रतशब्दं श्रुत्वा का तत्र प्रायश्चित्तिरिति
सोऽग्नये सुरभिमतेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये अग्निर्होतान्यसीदद्यजीयान्त्सा
ध्वीत्स कर्द्देववीतिं नोअद्येत्याहुतिं वाहवनीये जुहुयादग्नये सुरभिमते स्वाहेति सा तत्र प्रायश्चित्ति १८
स्तदा कुर्यात् आहिताग्निर्यस्य भार्या गौर्वा यमौ जनयेत्का तत्र प्रायश्चित्तिरिति सोऽग्नये मरुत्वते त्रयोदश
कपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये मरुतो यस्य हि क्षयेरा इवेदवरमा अहेवेत्याहुतिं

वाहवनीये जुहुयादग्नये मरुत्वते स्वाहेति सा तत्र प्रायश्चित्तिस्तदा कुर्यादपत्नीकोऽप्यग्नि
होत्रमाहरेत् नाहरेत् इति आहरेदित्याह कुर्यदि नाहरेदनद्धा पुरुषः कोऽनद्धा
पुरुष इति न देवान्न पितॄन्न मनुष्यान् इति तस्मादपत्नीकोऽप्यग्निहोत्रमाहरेत्तदेषाभियज्ञ
गाथा गीयते यजेत सौत्रामण्यामपत्नीकोऽप्यसोमपः मातापितृभ्यामनृणो यद्यजेतिवचना
द्धुतिरिति तस्मात्सोमं याजयेत् ८ नाष्मः पंचत्रिंशः प्रश्नोत्तरे दर्शयति तदा आहिता
ग्निः स्वस्मिन् जीवत्येव स्वकीयमरणशब्दं यदा द्वेषिमुखाच्छृणुयात्तदानीं सुरभिमद्गुण
युक्तोऽग्निर्देवता षट्त्रिंशः प्रश्नोत्तरे दर्शयति तदा आहिताग्निर्योऽस्ति तस्य तस्मिन्नर्थे य
स्येति शब्दः प्रयुक्तः तस्याहिताग्नेर्भार्या वा तद्गृहावस्थिता गौर्वा यमौ वा पत्यद्वयं सह जनये
त्तदानीं मरुत्वद्गुणयुक्तोऽग्निर्देवता सप्तत्रिंशः पर्याये कं विधिं चारमुद्भावयति तदा पु

२९

रुषे जीवति सति यस्य भार्या म्रियेत तेन तदानीमाहितैरग्निभिर्भार्यायां दाह इत्येकः पक्षः तथा
च मनुः भार्यायै पूर्वमारिण्यै दत्त्वाग्नीनंत्यकर्मणि पुनर्दारक्रियां कुर्यात्पुनराधानमेव च
ति आहितेभ्योऽग्निभ्योऽन्येनाग्निना भार्यां दहेदिति द्वितीयः तथा चाश्वलायनः आहार्ये
णानाहिताग्निं पत्नीं चेति भारद्वाजोऽप्याहानिर्मथ्य तपत्नीमिति अस्मिन्पक्षे पुनरपि वि
वाहेच्छारहितत्वादयमपत्नीक एव वर्त्तते सोऽग्निहोत्रमाहरेदनुतिष्ठेन्नवेति स्तुतिद्वयं
विचारार्थः तत्र निर्णयं दर्शयति आह अननुष्ठाने बाधं दर्शयति यदि अहेति सत्य
नाम तद्वैपरीत्यादनृतः पुरुषो नष्टा पुरुषे अननुष्ठानो नानृतो न वेदित्यर्थः प्रश्नोत्तराभ्यां
शास्त्रार्थं निश्चिनोति कोऽन अनष्टाशब्देन को विवक्षित इति प्रश्नः यः पुमान्देवानपूजये
दिति शेषः पितॄनपि न पूजयेत् मनुष्यानतिथीनपि न पूजयेत् तादृशः पुमाननष्टापुरु

२९

ष इत्युत्तरं अग्निहोत्रस्याननुष्ठाने सत्यनष्टापुरुषो भवेदिति विपक्षे बाधमुक्त्वा स्वपक्षमु
पसंहरति तस्मा उक्तार्थदार्ढ्याय शाखांतरगतां गाथामुदाहरति तदेत त्तस्मिन्नवस्था
नुष्ठानरूपेऽर्थे एषा वक्ष्यमाणा यज्ञमभिलक्ष्य सर्वैर्गीयमाना यज्ञगाथा याज्ञिकैर्गीयते प
ठ्यते तां गाथां दर्शयति यजे अपत्नीकोऽपि पुमान्सौत्रामण्या यजेत् सौत्रामणीयागमपि
कुर्यात् किमुताग्निहोत्रादिकं हविर्यज्ञेष्वस्याधिकारोऽस्तीत्यर्थः न तु सोमयागेऽधिका
रशंकायां तद्व्यावृत्त्यर्थमसोमप इत्युच्यते यथापत्नीरहितोऽपि मात्रे पित्रे वा स्नानाच्छादना
दिकं ददाति तद्वदग्निहोत्रमपि कुर्यादिति शेषः अत्र हेतुरनृणार्थात् इति ऋणपरिहा
रनिमित्तं तथा च शाखांतरे श्रूयते जायमानो वै ब्राह्मणस्त्रिभिरृणवा जायते ब्रह्मचर्येण
र्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी वासीति अने

नैवाभिप्रायेणश्रुतिः श्रुतेर्यजतिवचनमस्तियजदेवानधीत्यवेदान्प्रजामुत्पादयेति शा

२० खांतरेवचनमस्ति तस्माद्वचनादनुष्ठानं यएयुवक्तइतिगाथाया अर्थः तथाच विष्णुःस्म

रति सृतायांमापि भार्यायांवैदिकं नत्यजेत् द्विजः उपाधिनापियत्कर्म यावज्जीवंसमाप

येदिति उपाधिः कुशमयादिपत्नीकल्पनां तथाच स्मृत्यंतरं अन्येकुशमयींपत्नीं कृ

त्वातुगृहमेधिनः अग्निहोत्रमुपासंते यावज्जीवमनुव्रताः इति तथाच मैत्रायणीय

श्रुतिरप्याम्नायते यस्तुस्वैरग्निभिर्भार्यांसंस्करोति कथंचन असौमृतस्त्रीभवतिस्त्रीचैवा

स्यपुमान्भवेत् तस्मान्मृतभार्योपिस्वकीयानवस्थाप्याग्निहोत्रमाहरेत् तदभिप्रेत्यो २०

पसंहरति तस्मात्सौम्यंयाजयेदिति ऋणएककरणार्थ दोषराहित्यात्सौम्यः तादृश

मवरूपमग्निहोत्राद्यनुष्ठापयेत् इतिध्यायां द्वात्रिंशोध्याये ष्टमः खंडः ७ ॥ ॥

हविः

मूलः तदाकुर्यद्दर्शपूर्णमासयोरुपवसति नहवा अव्रतस्यदेवा अश्नंति तस्मादुपवसत्युतमे देवा

हविरश्नीयुरिति पूर्वांपौर्णमासीमुपवसेदिति पैंग्यमुत्तरामिति कौषीतकंयापूर्वापौर्णमासी

सानुमतिर्योत्तरा साराका या पूर्वामावास्या सासिनीवाली योत्तरा साकुहूर्यापर्यस्तमियादभ्यु

दियादिति सातिथिः ८ भाष्यः अतऊर्ध्वंखंडद्वयंदेशविशेषेणकेचिदामनंति केचि

न्नामनंति अतएव पूर्वनिबंधकाराः पाठरहितदेशानुसारेण तद्व्याख्यानमुपेक्षितवंतः

अस्माभिस्तुपाठोपेतदेशानुसारेण तद्व्याख्यायते तद्भुतनिमित्तमुपवासंविधत्ते तदा तत्र

स्मिन्निष्टानुष्ठानविषये ब्रह्मवादिन एवमाहुः यःकोप्यनुष्ठाता दर्शपूर्णमासयोरुपवासंकु

र्यात् यागरूपंव्रतनिश्चित्य गार्हपत्याद्यग्निसमीपयोवासः उपवासः यद्वि देवा अस्यापि य

त्समीपेवसंतीत्येतदीयोनुष्ठानसंकल्प उपवासः अग्न्युपस्तरणादिना तदीयोनुष्ठानेनि

श्रेयो वगंतव्यः अत एव शाखांतरे श्रूयते उपास्मिं छ्वोयक्ष्यमाणे देवता वसंति य एवं विद्वान
२१ ग्निमुपस्तृणाति अत्र तस्य नियमविशेषस्वीकाररूपव्रतेरहितस्य पुरुषस्य हविर्देवा नेवाश्नंति न
स्मात्कारणाद्व्रतमेममापि हविर्नेदेवा अश्नीयुरित्यभेत्य नियमं स्वकृत्याग्निसमीपे उपवसेत् एत
देवाभिप्रेत्यापस्तंब आह आहवनीयागारे गार्हपत्यागारे वाग्नौ तइति यद्याम्याज्ञानपरित्याग
उपवासः तत्परित्यज्यारण्याज्ञानरूपं नियमं स्वीकुर्यात् अत एव शाखांतरीया आहुः यद्ग्राम्यानु
पवसति तेन ग्राम्यानवरुंधते यदारण्यस्याश्नाति तेनारण्यान्यदनाश्नानुपवसेत्पितृदेवत्यः स्या
दारण्यस्याश्नातीति अत्रोपवासतिथिविषये शास्त्राभेद वचनमाश्रित्य विकल्पं दर्शयति पूर्वा २१
खंडतिथिवशाद्यदा दिनद्वये पौर्णमासीतिथिः संपद्यते तदानीं पौर्णमासीं पूर्वामुपवसेत् पूर्व
दिने उपवासं कृत्वा परेद्युर्यजेतेति सामशाखाप्रवर्तकस्य पैंगेमहर्षेर्मतं उत्तरां पौर्णमासी

मुपवसेत् उत्तरस्मिन् दिने उपवासं कृत्वा ततोपि परेद्युर्यजेतेत्येकशाखाप्रवर्तकस्य कौषीतकी म
हर्षेर्मतं एतदेव मतद्वयमुपजीव्य स्मार्ता एवं वर्णयंति पर्वप्रतिपदोः संधिर्मध्याह्नात्पूर्वतोपि वा
अन्वाधानं पूर्वदिने तद्दिने यागइष्यते परश्चेत्परेद्युरिष्टिस्तद्दिने न्वाहितिर्भवेदिति नच पौर्णमासी
द्वयमज्ञावेविविदिष्यं अनुमतिराकाशब्दाभ्यां पौर्णमासीभेदस्य सर्वत्र व्यवहृतत्वात् तयोः स्वरू
पमभिधानकार आह कलाहीने सानुमतिः पूर्णे राकानिशाकर इति चतुर्दशीसंयोगाच्चंद्रम
सि कलाहीने सत्यनुमतिरित्युच्यते तत्संयोगाभावेन चंद्रमंडले पूर्णे सति राकेत्युच्यते पौर्ण
मासीन्यायममावास्यायामपि दर्शयति यापू अत्रापि चतुर्दशीयोगाच्चंद्रदर्शने सत्यमावास्या सि
नीवाली उच्यते तद्योगराहित्येन चंद्रदर्शनाभावे कुहूरिति तदप्यभिधानकारेणोक्तं सा दृष्टेंदुः
सिनीवाली सा नष्टेंदुः कला कुहूरिति अत्राप्युपवासयागयो~~र्वेदेमत~~ निर्णये मतभेदः पूर्ववत्तद्दृष्ट

२२

ष्यः अत्रपूर्वोत्तरदिनागतनिर्णयाय कर्मोपयोगिन्यास्तिथेः स्वरूपं दर्शयति व्याप अमावास्यां पौ
र्णमासीं वास्यां परिप्राप्य सूर्योस्तमियात् तथा यामभिलक्ष्य सूर्य उदियात् सेयमुदयास्तमयव्यापिनी
कर्मोपयुक्ततिथिः ।तादृश्यां तिथ्यामुदयास्तमययोर्मध्ये पूर्वोत्तरास्यां चतुर्दश्या प्रतिपच्चा मिश्रणे स
ति पर्वणो द्वैविध्यं भवति तस्मिन् द्वैविध्ये पूर्वोक्तिमत द्वयं द्रष्टव्यं ८ मूलं: पूर्वां पौर्णमासीमुप
वसेदनिर्ज्ञाय पुरस्तादमावास्यायां चंद्रमसं यदुपेति यद्यजते तेन सोमं क्रीणंति तेनोत्तरामुत्तरा
मुपवसेदुत्तराणि ह वै सोमो यजते सोममनु देवतमेतद्धि देवसोमं यच्चंद्रमास्तस्मादुत्तरामुपवसे ७
त्तराकुर्वीत अपत्नीकोग्निहोत्रं कथमेव जुहोति निविष्टे मृतापत्नी नष्टा वाग्निहोत्रं कथमग्निहो
त्रं जुहोति पुत्रान् पौत्रान् नप्तनित्याह अस्मिंश्च लोकेमुष्मिंश्चास्मिंल्लोके यं स्वर्गो स्वर्गेण स्वर्गं लो
कमारुरोहेत्यमुष्मैव लोकस्य संततिं धारयति यस्यैषां पत्नी नेच्छेत्तस्मादपत्नीकस्याधानं कुर्वीत

२२

पत्नीकोग्निहोत्रं कथमग्निहोत्रं जुहोति श्रद्धापत्नी सत्यं यजमानः श्रद्धा सत्यं तदित्युत्तमं मिथुनं श्र
द्धया सत्येन मिथुनेन स्वर्गान् लोकान् जयतीति ८ ९ भाष्यः तदेतदुपसंहरति पूर्वां पूर्वामिति
पैंगिमतस्योपसंहारः अमावास्यादिने पुरस्तात्पूर्वस्यां दिशि चंद्रमसमनिर्ज्ञाय च शास्त्रमार्गेण चंद्र
मदृष्ट्वा चंद्रोदयो न भविष्यतीति निश्चित्य यदुपैति उपवसति शास्त्रतदनियरस्ति यद्यजते परेद्युर्या
गं करोतीति यदस्ति तेनोपवासेन यागेन च उत्तरामुत्तरां आगामिपक्षगतां पौर्णमासीममावास्यां वो
पवसेत् उत्तराणि उपवासदिनादुत्तरेषु दिनेषु यजते स यागः सोमो भवति तं सोममनु सर्वमपि दे
वतं तृप्यतीति शेषः योयं चंद्रमा अस्ति एतदेव सोमं देवानामपेक्षितं सोमद्रव्यसदृशं वस्तु यस्मा
च्चंद्रमंडलं देवानां प्रियं तस्मान्मंडले संपूर्णमभिलक्ष्योत्तरां पौर्णमासीमुपवसेदिति पैंगीकोक्तिम
तस्योपसंहारः इति त्रिंशोध्याये नवमः खंडः पूर्वमपत्नीकस्याग्निहोत्रादिहविर्यज्ञानुष्ठानं प्र

२३

तिपादितं अथ तस्यैवापत्नीकस्य वाचिकं मानसं च द्विविधमग्निहोत्रं वा प्रतिपादनीयं तत्र वाचिक
विषयं प्रश्नमुत्थापयति तदा योपत्नीकः पुरुषः तस्य वाचा निष्पाद्यग्निहोत्रं तत् केन प्रकारेणा
नुष्ठातव्यमिति प्रश्नः तमेव प्रश्नं पुनर्विस्पष्टयति ननु नैष्ठिकब्रह्मचर्यादावप्यपत्नीकत्वमस्ति
तत्राग्निहोत्रप्रसंग एव नास्ति विध्यभावात् अतोपत्नीकत्वं विशिष्यते विवाहादूर्ध्वं अग्निहोत्र
निविष्टेनुष्ठानुमुपक्रांते सति पश्चात्पत्नी मृता भवति तादृशोत्रापत्नीकः तस्याग्निहोत्रं न
ष्टावानष्टमेव भवति पूर्वसिद्धैरग्निभिः पत्नीदाहप्रक्षेपे पुनरग्निहोत्रहेतूनामग्नीनामभावात्
अतोपत्नीकः कथमग्निहोत्रं जुहोतीति प्रश्नः तस्योत्तरमाह युवा योपत्नीकोग्निरहितः

२३

स्थविरत्वेनानुष्ठानुमशक्तश्च तादृशः पुमान् पुत्रादीन् प्रत्येवं ब्रूयात् आहुरिति बहुवचनं
छांदसं हे पुत्रपौत्रप्रपौत्राः शृणुत अस्मिन् लोकेमुष्मिन् स्वर्गलोके च श्रेयः संपादनीयं ।

अस्मिन् लोकेनुष्ठितैः पुरुषैर्यैर्यः स्वर्गः श्रेणिणश्रुत इति शेषः तं स्वर्गं लोकमस्वर्गो गस्वर्ग
विलक्षणेन कामकर्मा कामानुष्ठानेनारुरोहं आरोहेदित्येवं पुत्रादीन् प्रति वाचोपदिशति
एतदेव वाजसनेयिभिर्विस्पष्टमाम्नायते तस्मात्पुत्रमनुशिष्टं लोक्यमाहुः तस्मादेनमनुशास
तीति अनेन पुत्राद्यनुशासनेनामुष्यैव लोकस्य संततिमविच्छेदं धारयति संपादयति कुलपरं
परयाग्निहोत्रादि अनुष्ठानेन सर्वेषां स्वर्गप्राप्तेरविच्छेदाभावात् यस्य यः पुमान्नेषां पत्नीनैच्छेत्
स्वस्यानुष्ठानुमशक्तत्वेन पुनर्विवाहसाध्यामेतां पत्नीं नापेक्षेत तस्मात्तस्यापत्नीकस्य वाचा
प्रेरिताः पुत्रपौत्रादय आधानं कुर्वते तदाधानपूर्वकमग्निहोत्रमपत्नीकस्य वाचिकमित्युच्य
ते अथ मानसमग्निहोत्रं श्रुत्यन्तरात् संदर्शयति अथ सत्यं यजमानः श्रद्धा पत्नी सत्यं तदित्युत्तमं
मिथुनं श्रद्धया सत्येन मिथुनेन स्वर्गांल्लोकान् जयतीति पूर्वोक्तस्यैवापत्नीकोग्निहोत्रं स्वय

मेवमनसा जुहोमीति यदीच्छेदिति शेषः तदास्ता... [illegible] ...होम इति प्रश्नः अ
द्धेत्यादिकं तदुत्तरं येयं कर्म श्रद्धा सैव पत्नी यत्तु सत्यं सत्यवाक्यं वैदिकं [illegible] यजमा
नो श्रद्धा सत्यं चेति यद्द्वयमस्ति तदुक्तेन प्रकारेण भावितं यद्द्वन्द्वं [illegible] मिथुनं भवति तादृशेन
श्रद्धासत्यरूपेण मिथुनेन यजमान समनुष्ठानेन निष्पाद्य स्वर्गलोकं जयतीत्येवमुत्तरं संपन्नं
इति द्वाविंशोऽध्याये दशमः खंडः ८ मूलं तदाहुर्यस्याग्निमनुद्धृतमादित्योऽभ्युदियाद्वाभ्य
स्तमियाद्वा प्रणीतो वा प्राग्घोमादुपशाम्येत्का तत्र प्रायश्चित्तिरिति हिरण्यं पुरस्कृत्य सायमुद्ध
रेज्ज्योतिष्मत्कं हिरण्यं ज्योतिः ज्योतिः शुक्रमसौ तदेवं तज्ज्योतिः शुक्रं पश्यन्नुद्धरति रजतं
तद्धाय प्रातरुद्धरेदेतद्वा अस्य रूपं पुरा संभेदाच्छायानां नैव तज्ज्योतिषामप्सु ताश्छायां तरति
सा तत्र प्रायश्चित्तिस्तदाहुर्यस्य गार्हपत्याहवनीयावन्तरेणानो वा रथो वा श्वा वा प्रतिपद्येत का

तत्र प्रायश्चित्तिरिति नैतन्मनसि कुर्यादित्याहुरात्मन्यस्य हिता भवन्तीति यद्येन्मनसि कुर्वीत गार्हपत्या
दविच्छिन्नामुदकधारां हरेत्तन्तुं तन्वन्रजसो भानुमन्विहीत्याहवनीयात्सा तत्र प्रायश्चित्तिस्त
दाहुः कथमग्नीनन्वाधानो न्वाहार्यपचनमाहरेदनाहरेदिति २० भाष्यः इत्थम
ग्निहोत्रप्रायश्चित्तप्रसंगागतं अपत्नीकाग्निहोत्रादिकं परिसमाप्य प्रकृतमेव प्रायश्चित्तमनु
सरन् प्रश्नमुत्थापयति तदा सायंकाल आदित्यस्यास्तमयात्पुराग्निहोत्रार्थं गार्हपत्यादग्निमु
द्धरेत् प्रातःकाले तु सूर्योदयात्पुरोद्धरेदित्याम्नातं एवं सति यस्याग्निहोत्रिणोऽनुद्धृतमग्निम
भिलक्ष्यादित्य उदियाद्वा अग्न्युद्धरणात्प्रागेवोदयास्तमयौ भवत इत्यर्थः अथवास्य स्वका
ले प्रणीतोऽग्निराहवनीयदेशे स्थित्वा होमात्पूर्वमुपशाम्येत् तेषु त्रिषु विषयेषु प्रायश्चित्तं शङ्का
नोनस्योत्तरमाह हिरं यदा सूर्यास्तमयादूर्ध्वमुद्धरणीयं तदानीं हिरण्यं पुरस्कृत्योपर्यवस्था

ण्यवह्निमुद्धरेत् यदेतद्धिरण्यमस्तीति देतच्छुक्लं ज्योतिर्वै अत्यंतभास्वरः प्रकाशः असावादित्यो
२५ पि शुक्लं ज्योतिरत्यंतभास्वरः प्रकाशः तथा सति तदेव हिरण्यमेतत् ज्योतिरादित्यप्रकाशः अ
तः शुक्लदीप्तिमद्धिरण्यं पश्यन्नेवाग्निमुद्धरेत् प्रातःकाले तु रजतमंतर्द्धीयोपर्य्यवस्थाप्याग्नि
मुद्धरेत् एतच्च रजतं रात्रेः स्वरूपं रात्रौ हि चंद्रतारादिकं रजतसमानं दृश्यते अतो रजतेन
सूर्योदयात्प्राचीनो रात्रिकाल एवं संपद्यते यदाप्येतावते वत्रिविधप्रश्नोत्तरं संपन्नं तथा।
पि तेषु संगाग्नित्समुद्धरणं पुरेत्यादिना प्रदृश्यते छायानां संभेद एकीभावः सूर्यास्तमये
सत्येषामनुष्यच्छाया एषा वृक्षच्छायेति विभागो न जायते सोयं संभेदः तस्मात्पुरा सूर्यवशा प्रकाश
च्छायाविशेषो विज्ञायते तस्मिन्नेव काले सायंहोमार्थमाहवनीयमुद्धरेत् तत्रोपपत्ति २५
र्मृत्सु रित्यादिः यदिदं तमो यावच्छायातद्रूपमेव मृत्सु स्वरूपमेव अतः सत्यादित्यप्रकाशो ते

वज्योतिषाम् मृत्सुरूपं तमस्तद्रूपं छायां च तरति उल्लंघयति सेयमुक्ता तत्रैवैकल्यप्रायश्चित्तिः
नित्योद्धरणस्यापि वैकल्यविरोधित्वादुपचरितं प्रायश्चित्तं च पूर्वत्र सप्तत्रिंशोपर्याये पत्नीरहि
तस्याग्निहोत्रं विधायाष्टत्रिंशोपर्याये दर्शपूर्णमासयोरुपवासनिर्णये कोनचत्वारिंशोपर्याये वा।
चिकं मानसं वाग्निहोत्रमपत्नीकस्य विधाय चत्वारिंशो वह्न्युद्धरणकालातिक्रमे प्रायश्चित्तमुक्तं
अथैकचत्वारिंशो प्रश्नोत्तरे दर्शयति तदा गार्हपत्याहवनीययोर्मध्ये शाकटं वा रथो वाश्वा वाय
दागच्छेत्तदानी एतच्छकटादिकं मनसि न कुर्यात् अस्यानुष्ठातुरात्मनि स्वकोपे पारमार्थिकस्व
रूपे वेदांतप्रतिपाद्ये वस्तुनि हिता भवति नानि शाकुम्यदीन्यवतिष्ठंते अतः शाकटादिरूपत्वबु
द्धिं परित्यज्य परमात्मबुद्धिं कुर्यात् यद्यात्मविवेकाभावेन तच्छकटादिकं मनसि कुर्वीत शा
कटादिबुद्धिं न परित्यजेत् तदानीं गार्हपत्यादारभ्याहवनीयपर्यंतमविच्छिन्नामुदकधारां ह

२६

रेत् तत्रतं तु तन्वग्निति मंत्रः अथ द्विचत्वारिंशोपर्याये किंचिद्विचारमुद्भावयति तत्रा अन्वाहार्य
नामक ओदनः पच्यतेयस्मिन् दक्षिणाग्नौ सोहमन्वाहार्यपचनः तस्याहरणं अभिज्वलनमिष्ट
रादावन्वाधानकाले दक्षिणाग्निरभिज्वलनं कुर्यान्नवेति विचारार्थं स्तु निढ्वयं ४० मूलः
आहारयेदित्याकुः प्राणान्वाएषोभ्यात्मन्धत्ते योग्नीनाधत्ते योग्नीनाधत्ते तेषामेषोन्नाद तमोनेवति
यदन्वाहार्यपचनस्तस्मिन्नेतामाहुतिं जुहोत्यग्नयेन्नादायान्नपतयेस्वाहेत्यन्नादोहान्नपति
र्भवत्यस्मुते प्रजायान्नाद्यं यएवं वेदांतरेण गार्हपत्याहवनीयौ होष्यन्संचरेत्तैतेन हवाऽए
नंसंचरमाणमग्नयो विदुरयमस्मासु होष्यतीत्येतेन हवाऽअस्य संचरमाणस्य गार्हपत्या
हवनीयो पाप्मानमपहतः सोपहतपाप्मोर्ध्वः स्वर्गलोकमेतीति येब्राह्मणमु
पतिष्ठेत तमुत्आहरंति तदाकुः कथमग्नीन् प्रवत्स्यन्नुपतिष्ठेत प्रोष्यवाप्रत्ये

२६

प्रोष्यवाप्रत्येत्याहरहर्वेति तूष्णीमित्याकुस्तूष्णींवैश्रेयसऽआकांक्षतेथाप्याकुरहरहर्वाए
तेयजमानस्याश्रद्धयोऽप्रसमनात्प्रह्लावनाद्विभ्यतितानुपतिष्ठेतैवाभयमेभयं मेस्त्विन्स्यभयंहै
वास्मैभवत्यभयंहैवास्मैभवति ४१ भाष्यः तत्रनिर्णयंदर्शयति आहा आहारयेत्प्रज्व
लयेदित्येवमभिज्ञाआकुः तत्रेयमुपपत्तिः यः पुमानग्नीनाधत्ते एषएव पुमानध्यात्मंस्वात्म
स्वरूपेप्राणानेवधारयति योयमन्वाहार्यपचनोस्ति एषतेषामाहितानांचाग्नीनांमध्ये अति
शयेनान्नादः तस्मात्प्राणधारिणामन्नभक्षणसिद्धयेसोयंप्रज्वलनीयः प्रज्वलनीतेनस्मि
न्दक्षिणाग्नावग्नयेन्नादायेत्यादिमंत्रेणैतामाहुतिंजुहुयात् वेदनं प्रशंसति अन्ना वेदि
तास्वयंअन्नादोरोगराहित्येनभोक्तुंसमर्थोन्नयतिरन्नस्वामीचभवति तथाहिप्रजयापशु
भिरूपयासहान्नाद्यंप्राप्नोति पूर्वंगार्हपत्याहवनीययोर्मध्येप्राकरादिगमनंनिषिद्धं[illegible]

28

२४

कर्तुरपि मध्ये संचारनिषेधशंकायां तयावर्तयितुमाह अंतः यः पुमान् होष्यति स पुमान् गार्हपत्याहवनीयावंतरेण तन्मध्यगतेन मार्गेण संचरेत् एतेन मार्गेण संचरमाणमेनं होमकर्तारमग्नयः स्वमनसैवं विदुः अयमस्मासु होष्यतीति तस्मादग्नीनामभीष्टत्वात् तस्य संचारो युक्तः किंच होमार्थं संचरमाणस्य याष्मानमुभावग्नी विनाशयतः स च पापरहित ऊर्ध्वगामी स्वर्गं प्राप्नोति अस्मिन्नर्थे शाखांतरगतं बहुविधं ब्राह्मणमभिज्ञा उदाहरंति अथ त्रि चत्वारिंशोऽप्रश्नोत्तरे ऽरश्रो यति तदा यदाग्निहोत्री स्वगृहेऽग्नीनवस्थाप्य स्वयं ग्रामांतरं प्रतिवसति तदानीं प्रवत्स्यन्नग्निहोत्री प्रवासकाले कथमग्नीनुपतिष्ठेत अथवा प्रोष्य ग्रामांतरे गत्वा प्रत्येत्य पुनरागत्य कथमुपतिष्ठेत अथवा स्वगृहे तिष्ठन्नप्यहरहः प्रतिदिनं कथमुपतिष्ठेत इत्येतस्य प्रश्नत्रयस्य तूष्णीमित्यादिकमुत्तरं नात्र मंत्रपाठः कश्चिदस्ति किंतु तूष्णीमेवां जल्यादिना विनयं प्रदर्शयन्

२५

नुपतिष्ठेत लोकेपि सेवकाः तूष्णीं भूता एव संतो विनीताः श्रेयसः श्रेष्ठान् राजगुर्वादीन् पुरुषानाकांक्षते आगत्य स्वाभीष्टं प्रार्थयंते तस्मात्तूष्णीमुपस्थानमित्येकः पक्षः अथाप्याहुः अपि च अभिज्ञाः केचिदेवं यज्ञांतरं वदंति अहरहर्वै प्रतिदिनमेव वैतेऽग्नयो बिभ्यति भयकारणं यजमानस्येत्यादिनोच्यते होमे निष्पन्ने सति पश्चादुपयोगाभावात् यजमानस्याग्निष — द्वा भवति अतो यमग्नीनुद्वासयेदित्येकोऽन्यहेतुः प्रवासयेत् लौकिकपाकार्थं नीत्वा प्रवासनं वा कुर्यादिति द्वितीयो भयहेतुः अतो भयपरिहारायनानेनेन मंत्रेण सर्वत्रोपतिष्ठेत हे अग्नयः मत्तः सकाशाद्वो युष्माकमभयमस्तु युष्मत्सकाशान्ममाप्यभयमस्त्विति मंत्रार्थः एवमुपस्थानं कुर्वते तस्मै यजमानायाभयमेव भवति अन्यासो ध्यायसमाप्त्यर्थः इति माथर्वणीये वेदार्थप्रकाशे ऐतरेयब्राह्मणे द्वात्रिंशाध्याये एकादशः खंडः ११ मूलः हरिश्चंद्रो ह वैधस ऐक्ष्वाको राजापुत्र आस तस्य ह शतं जाया बभूवुस्तासु

पुत्रं नलेभे तस्य ह पर्वतनारदौ गृह ऊषतुः स ह नारदं पप्रच्छ यं न्विमं पुत्रमिच्छंति ये [illegible]
चन किंस्वित्पुत्रेण विंदते तन्म आचक्ष्व नारदेति स एकया पृष्टो दशभिः प्रत्युवाच [illegible]
नयत्यमृतत्वं च गच्छति पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखं यावंतः पृथिव्यां [illegible]
जातवेदसि यावंतो अप्सु प्राणिनां भूयान्पुत्रे पितुस्ततः शश्वत्पुत्रेण पितरो त्यायन् [illegible]
आत्मा हि जज्ञ आत्मनः स इरावत्यतितारिणी २ भाष्यः आहिताग्नेर्धृतावग्निहो[illegible]
ले तथा प्रायश्चित्तमपत्नीकहोमः इत्यादिवर्णितं उक्तं द्वात्रिंशाद्ध्यायैः कर्मवर्णत्रयान्वितं अ
प्यत्वष्टभिरध्यायैर्वर्णितं राजकर्तृकं तत्रक्रतौ राजसूये बद्धिष्टि पशु सोमको मध्ये भिषेचनीये
ह्नि शौनःशेपं शस्तं शृणुतो त्रयस्त्रिंशोयमध्यायः शौनःशेपेति नामवान् हरिश्चंद्रकथा तत्र कथिता
बहुपुत्रता तदेतदुपाख्यानं दर्शयति हरि हरिश्चंद्रो नाम राजर्षिः प्रस्कऐव हरिश्चंद्र ऋषी इति पाणि

तिनाम्नत्रितत्वात् स च वेधसो नृपतेः पुत्रः इक्ष्वाकुवंशोद्भवः राजा पुत्रहीनः आस स च शतसंख्या
नां जायानां मध्ये कस्यांचिदपि जायायां पुत्रं न लेभे तस्य राज्ञो गृहे पर्वतनारदनामानौ यावृषी तौ नि
वासं चक्रतुः तयोर्मध्ये नारदमृषिमेतया गाथया राजा पप्रच्छ तां गाथां दर्शयति यं न्विति ये देवमनु-
ष्यादयो विजानंति विवेकज्ञानयुक्ताः ये च पश्वादयो न विजानंति विवेकज्ञानरहिताः ते सर्वेपि मु
क्षिणः यं इमं पुत्रमिच्छंति ते न पुत्रेण किंस्विद्विंदंते किं नाम फलं पिता लभते हे नारद मे मह्यं तत्फलं
आचक्ष्वेति राज्ञः प्रश्नः तस्योत्तरमवतारयति स एव स नारदः एकया गाथया पृष्टः सन् दशभिर्गा
थाभिः प्रत्युत्तरं उक्तवान् तत्र प्रथमां गाथामाह ऋणं उत्पन्नस्य मुखेन जीवतः पुत्रस्य मुखं पिता य-
दि पश्येत् तदानीमस्मिन्पुत्रे स्वकीयमृणं लौकिकं वैदिकं च संनयति सम्यगवस्थापयति लौकि
कस्य अवस्थापनात् पुत्रपौत्रादिभिः ऋणं प्रत्यर्पणीयमिति स्मृतिकारा आहुः वैदिकं तु त्रिभिः ऋ

२९

एवान् जायत इत्यादिश्रुत्युक्तं पूर्वमेवोदाहृतं तस्य च पुत्रावस्थापनं संपत्तिनामकेन कर्मणा संप
द्यते तच्च कर्म वाजसनेयिभिराम्नातं अर्थोतः संपत्तिर्यदा प्रैष्यन्मन्यते अथ पुत्रमाह त्वं ब्रह्म त्वं ब्र
स्त्वं यज्ञस्त्वं लोक इति स पुत्रः प्रत्याह अहं ब्रह्म अहं लोक अहं यज्ञ इति ब्रह्म मया कर्तव्यं वेदाध्ययनं
मयानुष्ठेया यज्ञाश्च मया संपाद्या उत्तमा लोकाश्च ते तत्सर्वं पुत्रेण त्वयैव संपादनीयमिति पितृवाक्य
स्यार्थः सर्वमहं संपादयिष्यामीति पुत्रवाक्यस्यार्थः अत्राप्यारण्यककांडे संक्षिप्य संदर्शयिष्यते
सोस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयत इति एवमृणं पुत्रे समर्पयति तथैवामृतत्वं मरणरहितं
मुक्तिपदं च गच्छति पुत्रार्पितलौकिकवैदिकभारस्याविघ्नेन तत्वज्ञानसंपादनात् द्वितीयां गाथा
माह यावंतः पृथिव्यां भोगाः सस्यनिवासादयः जातवेदस्यग्नौ भोगाः दहनपचनादयः अप्सु भोगाः
स्नानपानादयः प्राणिनां एते सर्वे भोगा यावंतः संति ततस्तावद्भ्यः सर्वेभ्यो भोगेभ्यो भूयान् अभ्य

२९

धिकः पितुः पुत्रे भोगो विद्यते अत्यंतसुखहेतुत्वात् तथा चाहुः पुत्रोत्पत्तिविपत्तिभ्यां नापरं सुखदुःखयो
रिति तृतीयां गाथामाह शश्वत् पितरो जनकाः उत्पन्नेन पुत्रेण शश्वत्सर्वदा लोकद्वयेपि अत्यधिकं
बहुलं तमः ऐहिकमामुष्मिकं च दुःखं अत्यायन् अतिक्रामंति तथा च बोधायन आह पुदिति नरक
स्याख्या दुःखं च नरकं विदुः पुत्तः त्राणात्ततः पुत्रमिहेच्छंति परत्र चेति किंच हि यस्मात्कारणात्
पितुः पुत्र उत्पन्न इत्युक्ते सति पिता स्वस्मात्स्वयमेव जज्ञे उत्पन्न इत्युक्तं भवति ततः पिता यथा स्व
यं स्वकीयं दुःखं विनाशयति तथा पुत्रोप्येतदीयं दुःखं विनाशयतीति दृष्टव्यं तस्मात्स पुत्रः इरावत्
न्नयुक्तो अतितारिणी नदी समुद्रादेरतितरणहेतुर्नौरिति विशेषः यथा नौः दुर्घटं नद्यादिकं तारयति ए
वं पुत्रोप्यैहिकमामुष्मिकं च दुःखं तारयतीत्यर्थः ३ मूलं किंनु मलं किमजिनं किमु श्मश्रूणि किं
तपः पुत्रं ब्रह्माण इच्छध्वं स वै लोको वदावदः अन्नं ह प्राणः शरणं ह वासो रूपं हिरण्यं पशवो वि

28

३०

वाहाः सखाह जायाकृपणं ह दुहिता ज्योतिर्हपुत्रः परमे व्योमन् पतिर्जायां प्रविशति गर्भो भूत्वा स मातरं तस्यां पुनर्नवो भूत्वा दशमे मासि जायते तज्जाया जाया भवति यदस्यां जायते पुनः विभूतिरेषा भूतिर्बीजमेतन्निधीयते देवाश्चैतामृषयश्च तेजः समभरन्महत् देवा मनुष्यानब्रुवन्नेषा वो जननी पुनः नापुत्रस्य लोकोस्तीति तत्सर्वे पशवो विदुः तस्मात्पुत्रो मातरं स्वसारं चाधिरोहति २ भाष्य

चतुर्थीं गाथामाह किं नु अत्र मलं अजिनं श्मश्रु तपः शब्दैः आश्रमचतुष्टयं विवक्षितं मलरूपाभ्यां शुक्लशोणिताभ्यां संयोगात् मलशब्देन गार्हस्थ्यं विवक्षितं कृष्णाजिनसंयोगादजिनशब्देन ब्रह्मचर्यं विवक्षितं क्षौरकर्मराहित्यात् श्मश्रुशब्देन वानप्रस्थं विवक्षितं इंद्रियनियमसद्भावात् तपः शब्देन परिव्राज्यं विवक्षितं मलं गार्हस्थ्यं किंतु किं नाम सुखं करिष्यति न किंचिदित्यर्थः एवमुत्तरत्रापि योज्यं हे ब्राह्मणो विशाः विप्रक्षत्रियाद्याः सर्वे यूयं सुखहेतुत्वात् पुत्रमिछध्वं सर्वे स एव पुत्रः अ

३०

वदावदो लोकः वदितुमयोग्यानि निंद्यवाक्यान्यवदाः तैर्वाक्यैर्नोद्यते न कथ्यत इत्यवदावदः एवं प्रद्यदेनेतेन कथ्यत इति अवदावदः दोषराहित्यान्निंदानर्ह इत्यर्थः तादृशो लोको भोगहेतुः पुत्रः तस्मादाश्रमेभ्योप्याधिक्येन पुत्रेछा कर्तव्या यद्यपि हरिश्चंद्र एवात्र प्रष्टा तथापि तेन सह ऋषीणां बहूनां सन्नायामवस्थानात् ब्राह्मणा इति संबोधनं पंचमीं गाथामाह अन्नं अन्नादयो लोके सुखहेतुत्वेन प्रसिद्धाः तथाहि शरीरे प्राणावस्थितिहेतुत्वादन्नमिव प्राणः वासः शीतोपद्रवाद्रक्षकत्वेन शरणं गृहसमानं हिरण्यं कर्णाभरणादिकं दृष्टिप्रियत्वाद्रूपसंपादकं पश्वो वोगवाश्वादयः विवाहविशेषेण निर्वाहकाः जायाभोगसहकारित्वात्सखा ह सखिस्वरूपैव एवमेते सुखहेतुत्वे न प्रसिद्धा अपि तात्कालिकमल्पमेव सुखं प्रयछंति दुहिता ह पुत्री इति कृपणं केवलं दुःखकारित्वा दैन्यहेतुः तथा च स्मर्यते संतवे स्वजनदुःखकारिका संप्रदानसमये र्थहारिका यौवनेपि बहुदोष

२२

कारिकाशरिकाहृदयशारिकापि तुरिति पुत्रोह पुत्रस्तु ज्योतिःस्वरूपं तमोनिवारकत्वेन प्रकाश
रूपत्वेन सहि पितरं परमे व्योमन् उत्कृष्टे आकाशे परब्रह्मस्वरूपे अवस्थापयति आकाशस्तल्लिंगादि
त्येनेन व्यासस्त्रेण आकाशव्योमादि शब्दानां ब्रह्मपरत्वं निर्णीतं पुत्रस्य च ब्रह्मज्ञानहेतुत्वं पूर्वमेवा
मृतत्वं च गच्छतीत्यत्र प्रतिपादितं षष्ठीं गाथामाह पतिः पत्युराकारद्वयमस्ति वर्तमानपुरुषाकार एकः
रेतोरूपेण गर्भाकारो द्वितीयः जायाया अपि आकारद्वयमस्ति पतिरूपमाकारं प्रतिजाया भवति
गर्भरूपमाकारं प्रतिमाता भवति अतः स तादृशः पतिः स्वयं रेतोरूपेण गर्भो भूत्वा पूर्वमवस्थितां
जायां भविष्यदाकारेण मातृरूपं संतीं प्रविशति तस्यां मातरि पुनर्नवो भूत्वा पूर्वमस्यां मातर्युत्पन्नोज
रठः पुराणो पूर्वनूतनं बालो भूत्वा तस्यामिदानीं तन्याम स्यां मातरि गर्भपाके सति दशमे मासि उ
त्पद्यते तस्मात्पुत्रः स्वस्मादन्यो न भवति सप्तमीं गाथामाह तज्जा यद्यस्मात्कारणात् अस्यां गर्भ

२१

धारिण्यां अयं पिता पुत्ररूपेण पुनर्जायते तत्तस्मात्कारणात् लोकप्रसिद्धा जाया अस्ति सा जायते स्या
मिति पुत्ररूपाजाया शब्दवाच्या भवति किंच एषाभूत्या भूतिशब्दाया मभिधीयते भवत्यस्यां पुत्ररूपे
णपतिरित्येषा भूतिशब्दवाच्या रेतोरूपेणागत्य अस्यां पुत्ररूपेण भवतीत्याभूतिशब्दवाच्य एतदेत
स्यां स्त्रियां बीजं रेतोरूपं निधीयते प्रक्षिप्यते तस्मादुक्ताः शब्दा उपपद्यन्ते अष्टमीं गाथामाह देवा ए
तामेतस्यां योषिति देवाश्च महर्षयश्च स्वकीयं महत्तेजो रेतोरूपं सारं समभरन् पुत्रोत्पादनाय संपा
दितवन्तः स्वयमेव संपाद्य ततो मनुष्यानित्यब्रुवन् हे मनुष्या येयमिदानीं जायारूपेण वर्तते सेयं
पुनर्वो युष्माकं पुत्ररूपे जन्मनि जननी भवति नवमीं गाथामाह नापु लोको लोकजन्यं सुखं अपु
त्रस्य नास्ति नहि पुत्रदर्शनेन यत्सुखं तदन्यदर्शनेन क्वचिदपि दृश्यते इति यदस्ति तत्सर्वं गोम
हिष्यादयो जानन्ति यस्मात्तस्मादेव कारणात्पशु जातो जातः पुत्रो वृषः स्वकीयां मातरं भगिनीं वा पुत्रो हि

मूलः एषपंथा ऽ उरुगायः सुशेवो यं पुत्रिण ऽ आक्रमंते विशोकाः तं पश्यंति पशवो वयांसि च तस्मात्ते मा
३२ त्रापि मिथुनी भवंतीति ह स्मा ऽ ख्या १२ अथैनमुवाच वरुणं राजानमुपधाव पुत्रो मे जायतां तेन
त्वा यजा इति तथेति स वरुणं राजानमुपससार पुत्रो मे जायतां तेन त्वा यजा इति तथेति तस्य ह पुत्रो ज
४ स्वमा ज्ञे रोहितो नाम तं होवाचाजनि वै ते पुत्रो यजस्व मानेनेति स होवाच यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो
भवति निर्दशो न्वस्त्वथ त्वा यजा इति तथेति स ह निर्दश ऽ आस तं होवाच निर्दशो न्वभूद्यजस्व मानेने
ति स होवाच यदा वै पशोर्दंता जायंतेऽथ स मेध्यो भवति दंता न्वस्य जायंतामथ त्वा यजा इति
तथेति तस्य ह दंता जज्ञिरे तं होवाचाज्ञत वा अस्य दंता यजस्व मानेनेति स होवाच यदा वै पशोर्दंताः
पुनर्जायंतेऽथ स मेध्यो भवति दंता न्वस्य पद्यंतामथ त्वा यजा इति तथेति तस्य ह दंताः पेदिरे तं होवाचा ३२
पत्सत वा अस्य दंता यजस्व मानेनेति स होवाच यदा वै पशोर्दंताः पुनर्जायंतेऽथ स मेध्यो भवति दंता

न्वस्य पुनर्जायंतामथ त्वा यजा इति तथेति तस्य ह दंताः पुनर्जज्ञिरे तं होवाचाज्ञत वा अस्य पुनर्दंता यज
स्व मानेनेति स होवाच यदा वै क्षत्रियः सान्नाहुको भवत्यथ स मेध्यो भवति सन्नाहं नु प्राप्नोत्वथ त्वा य
जा इति तथेति ३ भाष्यः दशमीं गाथामाह एष इति पुत्रिणः पुत्रवंतो देवमनुष्यादयो विशोकाः शोकरहि
ताः संतो यं यथा तं सुखानुभवरूपं मार्गं आक्रमंते प्राप्नुवंति एष पंथाः पुत्रसुखानुभवरूपो मार्गः उरु
गायः ऋषिभिर्महद्भिः शास्त्रेंद्रो राजामात्यादिभिश्च गीयते तथा सुशेवः सुष्ठु सेवितुं योग्यः सुखाधि
क्यस्य विद्यमानत्वात् तं पुत्रसुखानुभवरूपं पशवो गवादयो वयांसि पक्षिणः संपश्यंति जानंति त
स्मात्ते पश्वः पक्ष्यादयः पुत्रसुखार्थं मात्रा सह मिथुनी भवंति किं किमुत अन्यथा स्त्रिया सह हे त्यर्थः नारदे
नोक्तां दशमीं गाथां निगमयति इति इति ह अनेनैव प्रकारेण अस्मै तस्मै हरिश्चंद्राय आख्यायोत्तरं
अभिधायावस्थित इति शेषः इति त्रयस्त्रिंशोध्याये प्रथमः खंडः पुत्रनिमित्तलोभप्रतिपादका नारदे

३३

नोक्तादशगाथा उदाहृत्य पुत्रजन्मोपायोपदेशपरं नारदवाक्यमवतारयति अथेति अथ पुत्रेच्छानिमि
त्तकथनानंतरं एनं पुत्रार्थिनं हरिश्चंद्रं नारद उवाच हे हरिश्चंद्र वरुणं राजानमुपधाव प्रार्थयस्व येन प्र
कारेण निश्चयः सोभिधीयते हे वरुण त्वत्प्रसादान्मे पुत्रो जायतां न तस्तेन पुत्रेण त्वां यजे त्वामुद्दिश्यय
ज्ञं करवाणीति प्रार्थनप्रकारं नारदोपदेशमुक्त्वा हरिश्चंद्रवृत्तांतं दर्शयति तथेति नारदोपदेशमंगीकृ
त्य हरिश्चंद्रो वरुणमुपससार प्रार्थयामास स वरुणोपि तथास्त्विति मदीयपुत्रोस्त्वित्येवं वरं दत्तवान् तेन
च वरेणोत्पन्नस्य रोहित इत्येतन्नामाभूत् अथ बहुभिः पर्यायैर्वरुणोक्तिं हरिश्चंद्रस्य प्रत्युक्तिश्च
प्रत्ययं प्रतिपाद्यते तत्र प्रथमं पर्यायं दर्शयति तं हेति तं हरिश्चंद्रं वरुण उवाच हे हरिश्चंद्र ते पुत्रो
जनि वै उत्पन्न एव अनेन पुत्रेण मामुद्दिश्य यागं कुर्विति एवं वरुणेनोक्ते हरिश्चंद्रः पुनः प्रत्युवाच यदा ३३
गार्थपशुर्यदा निर्दशो न भवति तदा स पशुर्मेध्यो यागयोग्यो भवति निर्गतानि अशौचदिनानि दश

संख्याकानि यस्मात्पशोः सोयं निर्दशः तस्मादयं नु क्षिप्रं निर्दशोस्तु अथानंतरं त्वा प्रति अहं यजे
इत्येतद्वाक्यं वरुणस्तथास्त्विति अंगीचकार द्वितीयमुक्तिप्रत्युक्तिपर्यायं दर्शयति स ह दशाहेना
शौचापगमे शुद्धत्वात् यथा यागयोग्यत्वं तथा दंतोत्पन्नत्वादवयवसंपूर्त्या यागयोग्यत्वमित्यभिप्रा
यः स्पष्टं अन्यत् तृतीयं पर्यायं दर्शयति तस्य अत्र तं वै जाता एव पद्यंते पतंति प्रथमोत्पन्ना दं
ता नामस्थायित्वेन मुख्यपश्ववयवत्वाभावात् तत्पाते सति पशोर्मेध्यत्वं चतुर्थं पर्यायं दर्शयति
तस्य अपत्सत वै पतिताः पुनरुत्पन्नानां दंतानां स्थिरत्वेन संपूर्णावयवत्वात्पशोर्मेध्यत्वं पंचमं पर्या
यं दर्शयति तस्य अज्ञत वै जाता एव पश्वंतरस्य पुनर्दंतोत्पत्तिमात्रेण मेध्यत्वेपि अस्य पशोः क्षत्रियत्वा
त्स्वजातस्य उचितधनुर्बाणकवचादि सन्नाहवत्त्वे सति जात्युचितत्वापारसंपत्तौ मेध्यत्वं तस्मात् नु
क्षिप्रमेवासौ सन्नाहं प्राप्नोतु अनंतरमेवायजा रस्तु इत्येवं वरुणोंगीचकार ॥ ॥ ॥

32

३४

मूलः सह सन्नाहं प्राप तं होवाच सन्नाहं नु प्रापो यजस्व मानेनेति स तथेत्युक्त्वा पुत्रमामंत्रयामास तत
तायं वै मह्यं त्वामदाद्धंत त्वयाहमिमं यजा इति स हवेत्युक्त्वा धनुरादायारण्यमयात् सोऽस्थौ संवत्सरमर
ण्ये चचार अथ हैक्ष्वाकं वरुणो जग्राह तस्य होदरं जज्ञे तदु ह रोहितः शुश्राव सोऽरण्याद्ग्राममेयाय तमिं
द्रः पुरुषरूपेण पर्येत्योवाच नानाश्रांताय श्रीरस्तीति रोहितः शुश्रुम पापो नृषद्वरो जन इंद्र इच्च
रतः सखा चरैवेति ५ भाष्यः षष्टं पर्यायं दर्शयति सह सन्नाहं प्राप्तेरूर्ध्वं स हरिश्चंद्रो वरुणोक्ति
मंगीकृत्य पुत्रमामंत्र्येवमुवाच उपलालनार्थं पुत्रेपि ततवाचिनस्तशब्दप्रयोगः हे तत हे पुत्र अय
मेव वरुणो मह्यं त्वां पुत्रं वरेण दत्तवान् हंत इष्टोऽहमिमं वरुणं यत् त्वया पुत्रेण यजे यागरूपां पूजां
करवाणीति हरिश्चंद्रस्योक्तिः अथ रोहितनाम्नः पुत्रस्य कृत्यं दर्शयति सह सह स खलु रोहिताख्यः
पुत्रः पितुर्वाक्यं निषिध्य स्वरक्षणार्थं धनुः स्वीकृत्य अरण्यं प्रत्युपगतोऽभूत् कस्मिंश्चिदरण्ये नैरंतर्ये

३४

ण स रोहितः संवत्सरं चचारेति इति तृतीयस्त्रिंशोऽध्याये द्वितीयः खंडः रोहितस्यारण्ये संवत्सरचरणानं
तरं जातिं नं हरिश्चंद्रादीनां वृत्तांतं दर्शयति अथ अथ रोहितस्यारण्ये संवत्सरवासानंतरमेव ऐक्ष्वाकं
इक्ष्वाकुवंशोत्पन्नं हरिश्चंद्रं वरुणो देवो रोगरूपेण जग्राह वरुणेन गृहीतस्य हरिश्चंद्रस्योदरं जज्ञे
जलेनापूरितं उच्छूनं महोदरनामकं रोगस्वरूपमुत्पन्नं तदु ह तदपि सर्वं अरण्ये स्थितो रोहितः पुत्रो
मनुष्यमुखाच्छुश्राव श्रुत्वा च स रोहितः पितरं द्रष्टुमरण्याद्ग्राममेव प्रत्याजगाम आगच्छंतं रोहितं मार्गे
मार्गमध्ये इंद्रः केनचिद्ब्राह्मणपुरुषरूपेणागत्य इदमुक्तवान् आसमंताच्छ्रांतः आश्रांतः सर्वत्र प
र्यायपठनेन श्रांतं प्राप्तः तद्विपरीतेनाश्रांतः एकत्रैव निवासशीलः तादृशाय तथाविधस्य पुरुष
स्य श्रीः बहुविधा संपदस्ति संपन्नास्ति यद्वा नानेति पदच्छेदः श्रांताय सर्वत्र पर्यटनेन श्रांतस्य ना
नाश्री बहुविधा संपदस्ति इत्यनेन प्रकारेण रोहित वयं नीतिकुशलानां पुरुषाणां मुखात् शुश्रु

२५

म वरोजनः विद्यादिभिः श्रेष्ठोपि पुरुषः नृषत् पापः नृषु मनुष्येषु सीदतीति नृषत् श्रेष्ठोपि वि-
धुगृहेषु सर्वदावस्थितः तैरव ज्ञातः पापः तुच्छो भवेत् अतस्त्वयापि त्वद्गृहे वासो न युक्तः न च अरण्ये
चरतो मम सहायो नास्तीति शंकनीयं इंद्र एव परमेश्वर एव चरतस्तव सखा भविष्यति तस्माच्चरेव
सर्वथा अरण्ये चरस्वेति एवमुवाच एवं बहुष्वपि पर्यायेषु द्रष्टव्यं तत्रेंद्ररोहितयोः संवादे प्रथमं
पर्यायं दर्शयित्वा द्वितीयं पर्यायं दर्शयति चरे रसोरण्याद्ग्राममेयाय तमिंद्रः पुरुषरूपेण पर्येत्यो
वाच पुष्पिण्यो चर। त्पुजं ब्राह्मणरूपस्येंद्रस्य वाक्यं श्रुत्वा ब्राह्मणोयं अरण्ये चरैवेत्येवं मामुक्तवा
निति मनसि ब्राह्मणवाक्ये महांतमादरं कृत्वा पुनरप्येकं संवत्सरं अरण्ये चरित्वा पश्चात्पितरं द्रष्टुं
ग्रामे तमागच्छंतं पुनरपि इंद्रो ब्राह्मणरूपेणागत्य एवमुवाच चरतः पर्यटनं कुर्वतः पुरुषस्य जंघे
पुष्पिण्यौ भवतः यथा पुष्पयुक्तो वृक्षः शाखालता वा अथवा सुगंधोयेनासेव्या भवति एवं चर

३५

तो जंघे श्रमजयेन सेव्ये भवतः तथैवात्मध्यदेहः भूष्णुर्वर्द्धिष्णुः फलग्रहिः आरोग्यरूपफलयुक्तो
भवति यथा वर्द्धमानो वृक्षः कालेन फलानि गृह्णाति एवं चरतः पुरुषस्य बीजादिदीपनादिपार
वेन मध्यदेहः आरोग्यरूपं फलं गृह्णाति तथैवास्य चरतः पुरुषस्य सर्वे पाप्मानः सर्वपापानि प्रप
थे प्रकृष्टे तीर्थक्षेत्रादिमार्गे श्रमेण नत्तद्देवतादिदर्शनेन तीर्थयात्रादिप्रयासेन हताः विनाशिताः
संतः शेरे शेरते शयाना इव भवंति यथा शयानाः पुरुषाः स्वकार्यं कृषिवाणिज्यादीकं कर्तुमश
क्ताः एवं पुण्येन विनष्टाः पाप्मानो दातुमसमर्था इत्यर्थः तस्मात्सर्वथारण्ये चरतः पितुर्गृहे वति
ष्ठस्व ध मूलः चरैवेति वै मा ब्राह्मणो वोचदिति इह द्वितीयं संवत्सरमरण्ये चचार सोरण्याद्ग्राम
मेयाय तमिंद्रः पुरुषरूपेण पर्येत्योवाच पुष्पिण्यौ चरतो जंघे भूष्णुरात्मा फलग्रहिः शेरेस्य सर्वे पा
प्मानः श्रमेण प्रपथे हतोश्चरैवेति वै ब्राह्मणो वोचदिति इह तृतीयं संवत्सरमरण्ये चचार सोरण्याद्ग्रा

३६

ममेयाय तमिंद्रः पर्येत्योवाच आस्ते भग ऽआसीनस्योर्ध्वस्तिष्ठति तिष्ठतः शेते निपद्यमानस्य च
रति चरतो भगश्चरैवेति चरैवेति वै मा ब्राह्मणो वोचदिति ह चतुर्थं संवत्सरमरण्ये चचार सोरण्या
द्ग्राममेयाय तमिंद्रः पुरुषरूपेण पर्येत्योवाच कलिः शयानो भवति संजिहानस्तु द्वापरः उत्तिष्ठं
स्त्रेता भवति कृतं संवत्सरं चरंश्चरैवेति चरैवेति वै मा ब्राह्मणो वोचदिति ह पंचमं संवत्सरमरण्ये च
चार सोरण्याद्ग्राममेयाय तमिंद्रः पुरुषरूपेण पर्येत्योवाच चरन्वै मधु विंदति चरन्स्वादुंबरं स
र्यस्य पश्य श्रेमाणं यो न तंद्रयते चरंश्चरैवेति चरैवेति वै मा ब्राह्मणो वोचदिति ह षष्टं संवत्सरमर
ण्ये चचार सोजीगर्त्तं सौयवसिमृषिमशनया परीतमरण्य ऽउपेयाय तस्य ह त्रयः पुत्रा ऽआसुः
शुनःपुच्छः शुनःशेफः शुनोलांगूल इति तं होवाच ऽऋषेहं ते शतं ददाम्यहमेषामेकेनात्मानं नि
ष्क्रीणा इति स ज्येष्ठं पुत्रं निगृह्णान ऽउवाच न न्विममिति नो ऽएवेममिति कनिष्ठं माता तौ ह मध्यमे सं

३६

पादयांचक्रतुः शुनःशेफे तस्य ह शतं दत्वा स तमादाय सोरण्याद्ग्राममेयाय स पितरमेत्योवाच तत हं
ताहमनेनात्मानं निष्क्रीणा इति स वरुणं राजानमुपससार नेनत्वा यजा इति तथेति भूयान्वै ब्राह्मणः
क्षत्रियादिति वरुण उवाच तस्मा ऽएतं राजसूयं यज्ञक्रतुं प्रोवाच तेमेनमभिषेचनीये पुरुषं पशुमालेभे
५ २४ भाष्यः तृतीयं पर्यायं दर्शयति चरैवेति भगः सो भाग्यं आसीनस्योपविष्टस्यास्ते तथैव तिष्ठ
ति न तु वर्द्धते अभिवृद्धिहेतो रुद्योगस्याभावात् तिष्ठतः उपवेशनं परित्यज्योच्छ्रायनं कुर्वतः पुरुषा
स्य त्वगः ऊर्ध्व ऽआभिवृद्ध्युन्मुखस्तिष्ठति कृषिवाणिज्याद्युद्योगस्य संभावितत्वान्निपद्यमानस्य भू
मौ शयानस्य भगः शेते निद्रां करोति विद्यमानधनरक्षादिचिंताया ऽअप्यभावात्सर्वथैव विनश्यति
चरतः तेषु तेषु देशेषु अर्जनार्थ पर्यटनां कुर्वतः पुरुषस्य भगः सो भाग्यं चरति दिने दिने वर्द्धते त
स्मात्वं चरैवेति नत्वेकत्र तिष्ठ चतुर्थं पर्यायं दर्शयति चरे चनस्तः पुरुषस्यावस्थाः निद्रातस्तुरि

35

त्यागः उत्थानं संचरणं चेति तास्वोत्तरोत्तरश्रेष्ठत्वात् कलिद्वापरत्रेताकृतयुगैः समानाः ततश्चव
रणस्य सर्वोत्तमत्वाच्चरैवेति तत् पंचमं पर्यायं दर्शयति चरै चरन्वै पुरुषः क्वचिद्वृक्षाग्रे मधुमाक्षि
कं लभते क्वचित्स्वादुमधुरमुदुंबरादिफलविशेषं लभते एतद्द्वयमुपलक्षणं तत्र तत्र विद्यमानं
भोगविशेषं लभते तत्र सूर्यो दृष्टान्तः यः सूर्यः सर्वत्र चरन्नपि न तंद्र्यते कदाचिदप्यलसो न भव
ति तस्य सूर्यस्य श्रेमायां श्रेष्ठत्वं जगद्वंद्यत्वं यस्मात्तस्माच्चरैव इत्थं इन्द्रकृतेन रोहितोपदेशेन च
रतो रोहितस्यैवं जीवनेपि तुरारोग्यस्य च कारणभूतं श्रेयोलाभं दर्शयति चरैति षष्ठे संवत्सरे पूर्व
वदरण्यसंचारी स रोहितः कंचिदपि तस्मिन्नरण्ये उपेयाय प्राप्तवान् कीदृशमृषिं अजीगर्त्तनाम
कं स्यवसस्य पुत्रं अन्नानयापरीतं अन्नालाभेन क्षुत्पीडितं अथाजीगर्त्तरोहितयोः संवादं दर्श
यति तस्य तस्याजीगर्त्तस्य शुनःपुच्छादिनाकामत्रयः पुत्रा आसुः पुत्रवंतमृषिं रोहितः उवाच

२७

हे ऋषे ते तु त्वं अहं गवां शतं ददामि ज्येष्ठपुत्रं शुनःपुच्छनामकं हस्तेन निगृह्णाणः स्वसमीपे समाक
र्षन् रोहितं प्रत्येवमुवाच तुन्नमेकः पुत्रो दीयते इमं तु शुनःपुच्छं तु न ददामि मम प्रियत्वात् इति तन्मा
ता कनिष्ठं हस्तेन गृहीत्वेवमुवाच इमं शुनोलांगूलं तु मम प्रियं नो एव सर्वथा नो ददामीति ततस्तावु
भौ मातापितरौ मध्यमे पुत्रे शुनःशेफे दानसंपादनं चक्रतुः अंगीकृतवंतौ ततस्तस्याजीगर्त्तस्य स
रोहितो गवां शतं दत्वा तं शुनःशेफं आदाय आवस्थितः ततः स रोहितः तेन शुनःशेफेन सहारण्यात्
स्वकीयग्रामं प्रत्याजगाम तदागमनादूर्ध्वकालीनं वृत्तांतं दर्शयति स पि रोहितः पितरमागत्यैव
मुवाच हे तत पितः हंत आवयोः हर्षः संपन्नः अहमनेन शुनःशेफरूपेण मूल्येनात्मानं मद्देहं
निष्क्रीणे मूल्यं दत्वात्मानं मोचयामीत्यर्थः तथा क्रमेण हरिश्चंद्रो वरुणमुपेत्यानेन शुनःशे
फेन ब्राह्मणेन त्वां यक्ष्यामीत्युक्तवान् स वरुणोपि तथेत्यंगीकृत्यैवमुवाच क्षत्रियात्तवपु

३८

आज्ञो हि तादृश्ययं ब्राह्मणो भूयादभ्यधिक एव मम प्रिय इत्युक्त्वा तस्मै हरिश्चंद्राय कर्तव्यत्वेन राज
सूयमुपदिदेश च स हरिश्चंद्रो राजसूयं प्रचक्रम्य तस्य मध्ये योऽभिषेचनीयाख्य एकाहः सोमयागः त
स्मिन् तमेनं शुनःशेपं पुरुषं पशुमालेभे सवनीयपशुत्वेनालब्धुं निश्चितवान् इति त्रयस्त्रिंशोऽध्याये तृ
तीयः खंडः ५ मूलः तस्य ह विश्वामित्रो होतासीज्जमदग्निरध्वर्युर्वसिष्ठो ब्रह्मायास्य उ
द्गातानस्मा उपाकृतोपनियोक्तारं न विविदुः स होवाचाजीगर्तः सौयवसिर्मह्यमपरं शतं दत्ता
हमेनं विशसिष्यामीति तस्मा अपरं शतं ददुः सो सिनिः शान एयायाथ ह शुनःशेप ईक्षांचक्रे
मानुषमिव वै मा विशसिष्यंति हंताहं देवता उपधावामीति स प्रजापतिमेव प्रथमं देवतानामुप
ससार कस्य नूनं कतमस्यामृतानामित्येतयर्चा ॥४॥ स होवाचाजीगर्तः सौयवसिर्मह्यमपरं शतं द
ताहमेनं नियोक्ष्यामीति तस्मा अपरं शतं ददुस्तं स निनियोजन तस्मा उपाकृताय नियुक्ताय आप्रीताय पर्यग्निकृ
ताय विशसितारं न विविदुः ॥४॥

३८

प्रजापतिरुवाचाग्निर्वै देवानां नेदिष्ठस्तमेवोपधावेति सोऽग्निमुपससाराग्नेर्वयं प्रथमस्यामृतानां ना
मित्येतयर्चा तमग्निरुवाच सविता वै प्रसवानामीशे तमेवोपधावेति स सवितारमुपससाराभि त्वा देव
सवितरित्येतेन तृचेन ६ भाष्यः हरिश्चंद्रस्य राजसूयानुष्ठानं दर्शयति तस्य विश्वामित्रादयो
महर्षयस्तस्य हरिश्चंद्रस्य यागे राजसूये होत्रादयश्चत्वारो हि महर्त्विज आसन् तत्र जमदग्निरध्वर्यु
रभिषेचनीये सोमयागे तं शुनःशेपं सवनीयपशुत्वेनोपाकृतवान् बर्हिर्युक्तया प्लक्षशाखया
मंत्रपुरस्सरं संस्पर्शनमुपाकरणं तत ऊर्ध्वं यूपबंधनं नियोजनं तस्य क्रूरकर्मत्वादध्वर्युर्न
नियोजने प्रवृत्तः ततः उपाकृतयास्मि उपाकरणेन संस्कृतस्य शुनःशेपस्य नियोक्तारं यूपवे
धनकर्तारं क्रूरं किंचिदपि पुरुषं न विविदुः न लेभिरे तदानीं सूयवसस्य पुत्रः सुमः शेपस्य पि
तासोऽजीगर्तः मह्यं पूर्वस्माच्छतादपि तं परं वा शतं हे यजमान त्वं देहि ततोऽहमेनं शुनःशेपं यू

पेनियोक्ष्यामि स्त्वानयाकयुत्वांतिरस्मिपार्श्योस्त्वं बध्वारज्जनायस्ययूपे बंधनं नियोजनंतरहं करिष्या

शु९ मीति तस्मै अजीगर्त्तायअपरंगोशतंददुः तं च शुनः शेफं सोऽजीगर्त्तोनिनियोज धातोर्हिर्नोवैपरि

त्यस्योपसर्गस्य द्विर्भावः छांदसः अथविशसनप्रवृत्तिंदर्शयति तस्मा उपाकरणनियोजनेपूर्व

मुक्ते आप्रीसंज्ञिताभिरेकादशभिः प्रयाजयाज्याभिः यद्यजनंतदाप्रीणनं दर्भरूपेनोल्मुकेन

त्रिःप्रदक्षिणीकरणं तस्यपर्यग्निकरणं तथाविधसंस्कारचतुष्टययुक्ताय तस्मै तस्य शुनःशेफ

स्य विशसितारं हिंसितारं पुरुषं क्रूरात्मानं कंचिदपि पुरुषं न लेभिरे ततोऽजीगर्त्तः पूर्ववदपरंगो

शतं गृहीत्वा मारयितुं असिं खड्गं निःशाने निशितं तीक्ष्णं कुर्वन्नेव इयाय जगाम पितुरजीगर्त्त शु९

स्य वृत्तांतं दर्शयति अथ अथ पितुः पुत्रमारणोद्योगानंतरं शुनःशेफः पुत्रोमनस्येवं मीमांसां

चक्रे विचारितवान् अन्यत्रपर्यग्निकृतं पुरुषमारण्यं श्वोत्सृजंतिहिंसायाइति श्रुतेः पर्यग्नि

करणादूर्ध्वं मनुष्यं परित्यजीते एते तु मां अमानुषमिव मनुष्यव्यतिरिक्तं अजादिपशुमिव विशसि

ष्यंति हंत हा कष्टमेतत्संपन्नं अहमितः परं रक्षार्थं उपधावामि गच्छामि इति विचार्य देवानां मध्ये प्रथ

ममुख्यं प्रजापतिमेवकस्य नूनमित्यृचा उपससार सेवितवान् तस्य प्रजापतेः सहकारित्वेनाग्नेः सेवां

दर्शयति तंप्र तं सेवकं शुनःशेफं प्रजापतिरेवमुक्तवान् अग्निः सर्वेषां देवानां नेदिष्ठोह विवर्ह

ने नातिसमीपवर्ती अतस्तमेवोपास्वेत्युक्तः शुनःशेफोऽग्नेर्वयमित्यृचाग्निमुपासितवान् तस्यै

वाग्नेः सहकारित्वेन सवितुरुपासनं दर्शयति तमा प्रसवानां सर्वेषु कार्यप्रेरणरूपाणां अ

वितुर्ज्ञानात्सवितार्दशः स्वामी भवति तस्मात्तमेवोपधावेत्यग्निनोपदिष्टोऽभित्वेतितृचेन सवि

तारमुपासितवान् ६ मूलः तं सवितोवाच वरुणाय वै राज्ञे नियुक्तोऽसि तमेवोपधावेति सवरु

णं राजानमुपससार तऽउत्तराभिरेकत्रिंशता तं वरुणऽउवाचाग्निर्वै देवानां मुखं सुहृदयतमस्तं

नुस्तुह्यथत्वोत्स्रक्ष्याम इति सोग्निं तुष्टावीतः उत्तराभिर्द्वाविंशत्या तमग्निरुवाच विश्वान्नु देवान्स्तु
ह्यथत्वोत्स्रक्ष्याम इति स विश्वान्देवांस्तुष्टाव नमो महद्भ्यो नमो अर्भकेभ्य इत्येतयर्चा तं विश्वे देवा
ऽऊचुरिन्द्रो वै देवानामोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमस्तं नुस्तुह्यथत्वोत्स्रक्ष्याम इति
स इन्द्रं तुष्टाव यच्चिद्धि सत्य सोमपा इति चैतेन सूक्तेनोत्तरस्य च पंचदशभिस्तस्मा इन्द्रः स्तूयमानः
प्रीतो मनसा हिरण्यरथं ददौ तमेतया प्रतीयाय शश्वदिन्द्र इति तमिन्द्र उवाचाश्विनौ नुस्तुह्यथ त्वो
त्स्रक्ष्याम इति सोश्विनौ तुष्टावातः उत्तरेण तृचेन तमश्विनावूचतुरुषसं नुस्तुह्यथ त्वोत्स्रक्ष्या
म इति स उषसं तुष्टावात उत्तरेण तृचेन तस्य ह स्म ऋच्यृच्युक्तायां वि पाशो मुमुचे कनीय ऐक्ष्वाक
स्योदरं भवत्युत्तमस्यामेवर्च्युक्तायां वि पाशो मुमुचे गदऽऐक्ष्वाकः आस ७ भाष्यः तस्य च
सवितुः सहकारित्वेन वरुणस्योपासनं दर्शयति तं स हे शुनःशेफ वरुणार्थं त्वं यूपे बद्धोसि अतो

वरुणमुपास्वेति सवित्रोक्तः पूर्वस्मात्सवितृविषयात्तृचात् उत्तराभिरेकत्रिंशत्संख्याकाभिरृग्भि
र्वरुणमुपासितवान् नहि ते क्षत्रमित्याद्याः सूक्तशेषभूता दशर्चः यच्चिद्धि ते विश इत्यादिकं एकविं
शत्यृचं सूक्तमित्येवं एकत्रिंशत्संख्या द्रष्टव्या तस्य च वरुणस्य सहकारित्वेन पुनरप्यग्नेरुपासनं
दर्शयति तं वै अयमग्निः सर्वेषां देवानां मुखं मुखस्थानीयः अग्निद्वारेण सर्वैर्देवैर्हविः स्वीका
रात् अत एव प्रीत्याह हविर्वहनादतिशयेन सुहृदयः सुहृदयतमं तमग्निं नु क्षिप्रं स्तुहीति वरुणेनो
क्तः पूर्वोक्ताभ्य ऋग्भ्यः उत्तराभिर्द्वाविंशतिसंख्याकाभिरृग्भिरग्निं तुष्टाव वसिष्ठो हीत्यादिकं द
शर्चं सूक्तं अश्वं न त्वेत्यादिकं श्योर द्वादशर्चं सूक्तं तत्रांत्यां परित्यज्य वसिष्ठसूक्तद्वयगतास्त्वृचो द्वाविं
शतिसंख्याका अग्नेः सहकारित्वेन विश्वेषां देवानां उपासनं दर्शयति तारं यद्यपि वरुणपाशेन ब
द्धत्वाद्वरुण एव शुनःशेफमुत्स्रष्टुं समर्थः तथाप्यग्न्यादीनां सहकारित्ववचनं दार्ढ्यार्थं द्रष्टव्यं वि

४१

श्वेदेवा गणरूपा न भवंति किंतु सर्वे देवाः तान् नमो महद्भ्य इत्येतयर्चोपासितवान् तेषां च विश्वे-
षां देवानां सहकारित्वेनेंद्रस्योपासनं दर्शयति तं वि ओजो बलादि शब्दाः पूर्वाचार्यैरेवं व्याख्या-
ता ऊर्जो दीप्तिर्बलं दाक्ष्यं यत्सघ्नकरणं सहः सुजनः सुशुप्ता रयिः स्तुः रूपक्रांतसमामिच्चरिति इष्ट
प्रत्ययतम पुत्रत्वया भ्यां तत्र तत्रातिशय उच्यते तादृशमिंदं यच्चिद्धि सत्यसोमपा इत्यनेन सर्वेन
सूक्तेनोत्तरस्मिन्नपि आ व इंद्रमित्यादिके द्वाविंशत्यृचे सूक्ते पंचदशभिर्ऋग्भिः स्तुत्वा नुष्टानपूर्वम
प्यनुग्रहेण चेतवेत्यन्यषिंडशाहि तं व्रत्सुपरिदेशा तस्योपदेशस्य फलपर्यवसायित्वमनुस्मरनः त
स्य इंद्रस्य शुनःशेपस्तुतेभ्यस्यातिशयं दर्शयति तस्याः शुनःशेपेनेंद्रः स्तूयमानः प्रीतो भूत्वा त
स्मै शुनःशेपाय सुवर्णमयं दिव्यं रथमारोहणार्थं स्वकीयेन मनसैव ददौ शुनःशेपेपि तदीयम
नुग्रहमवगत्य पूर्वोक्ताभ्यः पंचदशभ्यः उत्तरया शश्वदिंद्रः इत्येतया त्वचा तं रथं प्रतीयाय मनसै

४१

व प्रतिजग्राम इंद्रस्य सहकारित्वेनाश्विनोरुपासनं दर्शयति तमिं पूर्वोक्तायाः शश्वदिंद्र इत्यस्या
उत्तरेणाश्विनावश्वावत्येति तृचेनाश्विनौ स्तुतवान् अश्विनोः सहकारित्वेनोषधस्तुउपास्तिं
दर्शयति तमकस्तउषइत्यादिक उत्तरस्तृचः अथोक्तानां सर्वासां देवतानामनुग्रहेण शुनः
शेपस्य बंधमोक्षं हरिश्चंद्रस्यारोग्यं च दर्शयति तस्य तस्य पूर्वोक्तस्य तृचस्य तृचस्य संबंधिन्या
मृच्युच्यमानायामृच्येकैकस्यामृच्युक्तायां क्रमेण शुनःशेपस्य पाशो विमुमुचे विशेषेण मुक्तोभूत् ऐक्ष्वा
कस्य हरिश्चंद्रस्य यन्महोदरं तदपि क्रमेण कनीयोल्पत्वं भवति उत्तमस्यामृच्युक्तायां विपा
शो मुमुचे एव सर्वात्मना मुक्तोभूत् ऐक्ष्वाकोप्यगदो निःशेषेण रोगरहितः आस इति त्रयस्त्रिं
शोध्याये चतुर्थः खंडः ४ मूलं तमृत्विज ऊचुस्त्वमेव नोस्याह्नः संस्थामधिगच्छेत्यथ हैतं
शुनःशेपोंजःसवं ददर्श तमेताभिश्चतसृभिरभिसुषाव यच्चिद्धि त्वं गृहेगृह इत्यथैनं द्रोणकलश

(८)

मभ्यवनिनायोच्छिष्टं चम्वोर्भरेत्येतयर्चाऽथहास्मिन्नन्वारब्धे पूर्वाभिश्चतसृभिः सस्वाहाकारा
भिर्जुहवांचकाराथैनमवभृथमभ्यवनिनाय त्वंनोऽअग्नेवरुणस्य विद्वानित्येताभ्यामथैनम
५२ तऽऊर्ध्वमग्निमाहवनीयमुपस्थापयांचकार शुनश्चिच्छेपं निहितं सहस्रादित्यथह शुनःशेफो
विश्वामित्रस्यांकमाससाद सहोवाचाजीगर्तिः सौयवसिर्ऋषे पुनर्मेपुत्रं देहीति नेतिहोवाच
विश्वामित्रो देवावाइमंमह्यमरासतेतिस हदेवरातोवैश्वामित्रऽआस तस्यैते कापिलेयबाभ्रवाः
सहोवाचाजीगर्तिः सौयवसिस्त्वं वेहि विह्वयावहा इति सहोवाचाजीगर्तिः सौयवसिरांगिर
सोजन्मनास्याजीगर्तिः श्रुतः कविः ऋषेपैतामहात्तंतोर्मापगाः पुनरेहिमामितिसहो ५२
वाच शुनःशेफोऽअदर्शुस्त्वा शासहस्तं नयच्छूद्रेष्वलक्षत गवांत्रीणिशतानि त्वम
वृणीथामदंगिरेऽइति ८ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भाष्यः बंधनान्मुक्तस्य शुनःशेफस्योत्तरकालीनं वृत्तांतं दर्शयति तमृ देवतानुग्रहयुक्तं तं शुनः
शेफं विश्वामित्रादयः सर्वेऽऋत्विजएवमूचुः हे शुनःशेफ त्वमेव नोऽअस्माकं अस्याह्नोऽभिषेचनी
याख्यस्य संस्थां समाप्तिमभिगच्छ प्रापुहि अनुष्ठापयेत्यर्थः तैरेवमुक्ते सत्यनंतरं शुनःशेफ एत
मभिषेचनीयाख्यं सोमयागमंजःसवं ददर्श अंजसा ऋजुमार्गेण सवः सोमाभिषवो यस्मिन्यागे सों
जःसवः ताहृशंप्रयोगप्रकारं निश्चितवान् निश्चित्य च तं सोमं यच्चिद्धीत्यादिभिश्चतसृभिः ऋग्भि
रभिषुतं कृतवान् अथैनमभिषुतं सोमं एतयोच्छिष्टं चम्वोरित्यृचा द्रोणकलशमभिलक्ष्यावा
नितायद्रोणकलशे प्रक्षिप्तवान् अथानंतरमस्मिन्हरिश्चंद्रेत्वारब्धे शुनःशेफादेहमुपस्पृ
ष्टवति सत्युत्कांप्यस्त्वग्नेः पूर्वाभिः यच्चिद्धीत्यादिभिश्चतसृभिरृग्भिः स्वाहाकारसहिताभिः सो
मेजुहवांचकार यत्रग्रावेत्यादिकं सूक्तं नवर्चं तत्र यच्चिद्धीति पंचमी तामारभ्य चतसृभिरृग्भि

रभिषवः उच्छिष्टमित्यादिकानवमी तयाद्रोणकलशो प्रत्यक्षेण यत्रग्रावेत्यादिभिश्चतसृभिर्हेभि
४२ इत्येवं कृत्स्नस्य सूक्तस्य विनियोगः अथ होमानंतरमेव कर्त्तव्यमवभृथमभिलक्ष्यावनेतिनो
यत्सर्वमेवावभृथसाधनं तं हृशेनीत्वा त्वं नो अग्न इत्यादिकाभ्यामृग्भ्यामप्स्वेवावभृथयागं कृतवान्
अथ तथा कृत्वा तत ऊर्ध्वं सेनमाहवनीयमग्निं शुनःश्चिदित्यादिनोपस्थापयांचकार हरि
श्चंद्रमुपस्थाने प्रेरयामास सोयमंजःसवइष्टिपशुसांकर्य्यमंत्रेणांजसा ऋजुमार्गेण नुष्टि
तत्वात् विश्वामित्रजीगर्त्तयोः कंचित्संवादं दर्शयति अथ अथाभिषेचनीयसमाप्तेरनंत
रं हरिश्चंद्रसहिते ष्वृत्विक्षु विस्मितेषु सत्सु शुनःशेफः इत ऊर्ध्वं कस्य पुत्रोस्त्विति निचारे मति ४२
तदीये छेव नियामके ति महर्षेणां वचनं श्रुत्वा शुनःशेफः स्वेच्छया विश्वामित्रपुत्रत्वमंगीकृ
त्य सहसा तदीयमंकमाससाद पुत्रो हि सर्वत्र पितुरंके निषीदति तदानीं स्वपवसपुत्रो जीग

र्तो विश्वामित्रं प्रत्येवमुवाच हे महर्षे मदीयं पुत्रमेनं पुनरपि मह्यं देहीति स विश्वामित्रो नेति निरा
कृत्येवमुवाच प्रजापत्यादयो एवेम शुनःशेफं मह्यमरासत दत्तवंतः तस्मात्त्वं नदास्यामीति
स च शुनःशेफो देवैर्दत्तत्वाद्देवरात इति नामधारी विश्वामित्रपुत्र एवास तस्य तस्य च देवरातस्य
ते कपिलेगोत्रोत्पन्नाश्च बभ्रुगोत्रोत्पन्नाश्च बधवो नवन् अथ शुनःशेफाजीगर्त्तयोः संवादं
दर्शयति सहो विश्वामित्रेण निराकृतः सो जीगर्त्तः शुनःशेफं प्रत्येवमुवाच हे पुत्र त्वे वा
त्वमेव विश्वामित्रादयगतः सन्निहो अस्मद्गृहे गच्छ त्वदीयमाता चाहं चोभावावां विख्यावहे
विशेषेण त्वा कानं कारवावहै इत्युक्त्वा तूष्णीमवस्थितं तं शुनःशेफं प्रति पुनरपि कयाचिद्गा
थयेवमुवाच हि शुनःशेप त्वं जन्मना आंगिरसः अंगिरोगोत्रोत्पन्नः आजीगर्त्तिरजीगर्त्तस्य पुत्रः
कविर्विद्वान् शुनइत्येवं सर्वत्र प्रसिद्धः अतो हे महर्षे शुनःशेफ पितामहात्पितामहे नप्रजापति

नासंपादितात्तंतोःसंतानादंगिरोवंशान्मापगाः अपगतोमाभव तस्मात्पुनरपिमामेहिमत्सहंस
मागच्छ इत्युक्तःशुनःशेपस्त्वयमपिगाथयाप्रत्युत्तरंददौ शासोविशासनहेतुःखड्गः हे अजीग
र्त्तमद्धायशासहस्तंखड्गहस्तंत्वांसर्वेप्यदर्शुर्दृष्टवंतः यत्रक्रूरंकर्मशूद्रेष्वप्यतंतनीचेष्वपिना
लभ्सततनलब्धवंतो लौकिकाजनाः तादृशंक्रौर्यंत्वयाकृतंहि अंगिरः आंगिरसगोत्रोत्पन्नअ
जीगर्त्तःमत्सोनिमित्तीकृत्यत्वंगवांशतानित्रीणिअवृणीथाः वृतवानसितस्मादत्यंतकष्टइत्युक्तवा
न् ८ मूलः सहोवाचाजीगर्त्तःसौपवसिस्तद्वैमातातनपतिपापंकर्ममयाकृतंतदहंनिह्नुवेतुभ्यं
प्रतियंतुशतंगवामितिसहोवाचशुनःशेपोयःसकृत्पापकंकुर्यात्कुर्यादेनत्ततोपरंनापगाःशौ
द्रान्न्यायादसंदधेयंत्वयाकृतमित्यसंधेयमितिह विश्वामित्र उपपपादसहोवाचविश्वामित्रो
भीमएवसौपवसिःशासेनविशिशासिषुः अस्यान्मेतस्यपुत्रो भूर्मैवोपेहिपुत्रता

मितिसहोवाचशुनःशेपःसर्वैयथानोज्ञपयाराजपुत्रात्तथावद यथैवांगिरसन्नुपेयांतवपुत्र
तामितिसहोवाचविश्वामित्रज्येष्ठोमेत्वंपुत्राणांस्यास्तवश्रेष्ठाप्रजास्यात उपयादैवंमेदायंते
नवैत्वोपमंत्रयइतिसहोवाचशुनःशेपःसंज्ञानानेषुवैब्रूयात्सौहार्द्दायमेश्रियै यथाहंभर
तऋषभोपेयांतवपुत्रतामित्यथहविश्वामित्रःपुत्रानामंत्रयामासमधुछंदाःशृणोतनऋषभोरे
णुरष्टकः यंकेचभ्रातरःस्थानास्मैज्यैष्ठ्यायकल्पध्वमिति ॥ १५ भाष्यः पुनरप्यजीगर्त्तःशु
नःशेपयोरुक्तिप्रत्युक्तीदर्शयति सहो शुनःशेपेनोपालब्धोजीगर्त्तःस्वकीयमनुतापंदर्शयि
तुंकांचिद्गाथामेवमुवाच हेतातपितृवदुपलालनीयशुनःशेपमयायत्पापंकृतंतद्वैमातपति
तदेवमांमनसिसंतप्तंकरोति अहं तत्पापंनिह्नुवेपरिहरामि गवांशतानिपूर्वंमयागृहीता
नित्रीणियानितानितुभ्यंत्वदर्थंप्रतियंतुप्रत्येकमेवप्राप्नुवंतु इतरयोःपुत्रयोर्गावोमाभवन्

तवैवसर्वाः सर्वाः संस्थितिततः शुनःशेपो गाथया प्रत्युत्तरं ददौ यः पुमान् धर्मशास्त्रभीतिर
४५ हितः सकृत्पापकं कुर्यात् स पुमान् ततः पापादन्यदेन न पापं तदस्य सवत्रात् कुर्यादेव त्वं तु शौ
द्रात् न्यायान्वीव जातिसंबंधिनः क्रूराचरणान्नापगाः अपगतोन नवसि असंधेयं प्रतिसं
धानरहितं पापं त्वया कृतमित्येषा शुनःशेपस्य प्रत्युक्तिः अथ विश्वामित्रस्य कृत्यं दर्शयति
असं असंधेयं अप्रतिसमाधेयं पापमिति शुनःशेपेन यदीरितं तदेतदप्रतिसमाधेयत्वं विश्वा
मित्र उपपादयुक्तिभिरुपपादितवान् तदुपपादनार्थमेव विश्वामित्र इमां गाथामुवाच स एव स
स्य पुत्रो जीगर्तः भीम एव न यहेतुरेव सन् शासनेन हस्तगतखड्गेन सविशिशासिपुरस्तात् वि ४५
शसनं कर्तुमिच्छुरवस्थितवान् अतो हे शुनःशेप एतस्य पापिष्ठस्य पुत्रो माभूः किंतु ममैव पु
त्रतामुपेहि अथ शुनःशेपविश्वामित्रयोरुक्तिप्रत्युक्ती दर्शयति सहो विश्वामित्रेणैवं बो

धितः शुनःशेपः पुनरपि गाथया विश्वामित्रं प्रत्येवमुवाच अयं विश्वामित्रो जन्मक्षत्रियः
सन् स्वकीयेन तपोमहिम्ना ब्राह्मण्यं प्राप्तवानित्येवं तत् वृत्तान्तं सूचयित्तु हे राजपुत्रेति संबो
धितवान् स वेत्तथाविधो राजजातीय एव सन् यथायेन प्रकारेणनोस्माभिः सर्वैरासमंतान्नत्र
पया ब्राह्मणेन त्वं न ज्ञायसे तथैवास्मद्विषयेपि त्वं वद कथं वृदितव्यमिति तदुच्यते अहमिदा
नीमंगिरोगोत्रः सन् तत्परित्यागेन तव पुत्रत्वं येनैव प्रकारेणापेयां तथैवानुग्रहाणेतिशेषः
एतद्वाक्याभिप्राय पूर्वैः संक्षिप्य दर्शितः पुरात्मानं नृपं विप्रप्रतपसा कृतवानसि एवमांगि
रसं मातं वैश्वामित्रमृषेकुर्विति ततो विश्वामित्रो गाथया प्रत्युत्तरमुक्तवान् हे शुनःशेप त्वं
सेपुत्राणां मध्ये ज्येष्ठः स्यां ज्येष्ठानवनं च पुत्रादिरूपा प्रजापीतरस्याः श्रेष्ठा स्यात् इमं मह्यं विश्वा
मित्राय देवं देवैः प्रसन्नैर्दत्तं दायं पुत्रतुरूपत्नात् समुपेयाः प्राप्नुहि तेनैव तेनैव कारणेन त्वो

पमंत्रयेत्वां पुत्रत्वेन व्यवहरामि शुत नरपिः शुनःशेपविश्वामित्रयोर्वृत्तांतं दर्शयति सहो विश्वा
मित्रेण प्रलोभितः शुनःशेपः स्वकार्यं राज्ञ्योर्गाथयैवमुवाच संज्ञानानेषु मद्विषयेक
मत्संज्ञानेषु त्वदीयपुत्रेषु सर्वोपि मां ब्रूयात् ज्येष्ठभ्रातृत्वेन व्यवहरतु न त्वं मे मम सौहार्द्याय
भ्रातृभिरितरैः स्नेहातिशयाय श्रियै धनेलाभाय च संपद्यते हे भरतर्षभ भरतवंशश्रेष्ठ वि
श्वामित्र अहं तव पुत्रतां यथा येयां तथैतेषां पुत्राणां मध्ये अनुगृहाण इति शेषः ततो विश्वामि
त्र इतरान् आह्वयगाथयैवमाज्ञापितवान् श्रायो मधुच्छंदो नामपञ्चर्षभ नः योपि रेणुः योऽष्टक ए
ते मुख्याः हे पुत्रकाः शृणोतन मदीयाज्ञां शृणुत ये केचिद्यूयं सर्वे भ्रातरः स्याति सर्वेऽप्यस्मै शु
नःशेफादस्मादपि ज्येष्ठाय न कल्पध्वं ज्येष्ठत्वाभिमानं मा कुरुत किं त्वसावेव युष्माकं मध्ये ज्ये
ष्ठो भूत्वावतिष्ठतामिति इति त्रयस्त्रिंशोध्याये पंचमः खंडः ५ ॥ ॥ ॥

मूलः तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः पंचाशदेव ज्यायांसो मधुच्छंदसः पंचाशत्क
नीयांसस्तद्ये ज्यायांसो न ते कुशलं मेनिरे ताननुव्याजहारान्तान्वः प्रजा भक्षीष्टेति तऽएते ऽन्ध्राः
पुंड्राः शबराः पुलिंदाः मूतिबा इत्युदंत्या बहवो भवंति वैश्वामित्रा दस्यूनां भूयिष्ठाः सहोवाच
मधुच्छंदाः पंचाशता सार्धं यन्नः पिता संजानीते तस्मिंस्तिष्ठामहे वयं पुरस्त्वा सर्वे कुर्महे त्वामन्वं
चो वयं स्मसीत्यथ ह विश्वामित्रः प्रतीतः पुत्रास्तुष्टाव ते वै पुत्राः पशुमंतो वीरवंतो भविष्यथ
ये मानं मे तुगृह्णंतो वीरवंतमकर्त्त माऽपुर एत्रा वीरवंतो देवरातेन गाथिना सर्वे राध्यास्थ पु
त्रा एष वः स द्विवाचनं एष वः कुशिका वीरो देवरातस्तमन्वितः युष्मांश्च दायं मः उपेता विद्यां
यामु च विद्मसि ते सम्यंचो वैश्वामित्राः सर्वे साकं सरातयः देवराताय तस्थिरे धृत्यै श्रैष्ठ्याय गा
थिनाः १० भाष्यः अथ विश्वामित्रपुत्राणां वृत्तांतमाह तस्य मधुच्छंदो नामकः कश्चित्तु

45

४१

त्रोमध्यमः ततोपिज्येष्ठाः कनिष्ठाश्च प्रत्येकं पंचाशत् संख्याका इत्येवमेकशतं तस्य पुत्राः तेषां
मध्ये ज्येष्ठानां वृत्तांतमाह तथैव तत्रैवैकशतसंख्याकेषु पुत्रेषु मध्ये येमधुच्छंदसो ज्येष्ठाः पंचा
शत्संख्याकाः संति तेश्शुनःशेपस्य विश्वामित्रपुत्रत्वं कुशलं न मेनिरे इदं समीचीनमित्येवं नां
गीकृतवंतः तान् ज्येष्ठान् पंचाशत्संख्याकान् अनुलक्ष्य विश्वामित्रो व्याजहार व्याहरणं शाप
रूपं वाक्यमुक्तवान् हे ज्येष्ठपुत्राः युष्माकं मदीयाज्ञातिलंघिनां प्रजाः पुत्रादिकं अंतान् भक्षीष्ट
चांडालादिरूपा नीचजातिविशेषान् भजतामिति तत एते शामाः संतो ध्रुत्यादिपंचविध नीच
जातिविशेषा भवंति इति शब्दस्य तत्प्रदर्शनार्थत्वात् अन्येपि नीचजातिविशेषाः सर्वे विवक्षि
ताः उक्तानांतउदंतः अत्यंतनीचजातिः तत्र नवादंत्याः ते बहवोऽनेकविधाः वैश्वामित्राः
विश्वामित्रसंततिजा दस्यूनां तस्कराणां मध्ये भूयिष्ठाः अत्यधिकाः ज्येष्ठानां वृत्तांतमुक्त्वा म

४१

धुच्छंदसः तत्कनिष्ठानां च वृत्तांतं दर्शयति सहो कनिष्ठपुत्राणां पंचाशता सह मधुच्छंदो ना
मकः स मध्यमः पुत्रः शुनःशेपं प्रत्येवमुवाच हे शुनःशेप नोस्माकं पिता विश्वामित्रो यत्कार्यं
त्वदीयज्येष्ठपुत्रत्वरूपं संजानीते सम्यग्जानीत्यंगीकरोति तस्मिन् कार्ये तिष्ठामहे तत्कार्य
मंगीकुर्मः सर्वे वयं त्वा शुनःशेपनामानं त्वां पुरस्कुर्महे पुरस्कृत्य ज्येष्ठं कृत्वा वर्त्तामहे त्वाम
न्वंचः शुनःशेपमनुगच्छंतः स्मसि स्म वाम इत्युक्तवान् विश्वामित्रवृत्तांतं दर्शयति अथ अ
थ मधुच्छंदः सहितानां पंचाशत् कनिष्ठपुत्राणां शुनःशेपविषयज्येष्ठपुत्रत्वमंगीकारानंत
रं स विश्वामित्रः प्रतीतः तेषु प्रत्ययं मद्वचनकृताः इति विश्वासं प्राप्तः स्वान्पुत्रान् गाथाभिस्तुष्ट
वान् तत्र प्रथमां गाथामाह तेवै हे मधुच्छंदःप्रमुखाः कनिष्ठपुत्राः ये यूयं मे मानं मदीयं मतमनु
गृह्णंतः आनुकूल्येन स्वीकुर्वंतो मां विश्वामित्रं वीरवंतं स्वधर्मस्मर पुत्रयुक्तं अकर्त्त कृतवंतः

४८

तेवैतादृशायूयंबहुविधपशुपुत्रयुक्ताबहुविधानुकूलापुत्रयुक्ताश्चभविष्यथ द्वितीयांगाथा
माह पुर गाथिनगोष्ठोविश्वामित्रस्यमितरमाचष्टे हेगाथिनागाथिपौत्राःपुरएत्रायुष्माकंपु
रा.तोमंत्रामुख्येनदेवरातेनसहयूयंसर्वेवीरवंतःश्रेष्ठपुत्रयुक्ताः राध्याःस्थसर्वेपुरुषेराराधनीया
:पूज्यानवथ हेपुत्रामधुछंदःप्रभृतयः एषदेवरातोवोयुष्माकंसद्विवाचनंसन्मार्गस्यविशेषतोध्या
पनंकरिष्यतीतिशेषः तृतीयांगाथामाह एषवः हेकुशिकाः कुशिकनाम्नोमत्पितामहस्यसं
बंधिनोमधुछंदःप्रभृतयएषदेवरातोवोयुष्माकंज्येष्ठश्चातेतिशेषः तंदेवरातंयूयमन्वितअनु
गतानवत मेयदीयंधनंयुष्मांश्चउपेताप्राप्स्यतिचकाराद्देवरातंचयामुचयामपिकांचिद्वेदशा ४८
स्त्रादिरूपांविद्यांयिद्यसिवयंजानीम सापियुष्मानुपेताप्राप्स्यति चतुर्थींगाथामाह तेसहैवे
श्वामित्राविश्वामित्रस्यममपुत्रायागाथिनाःगाथिपुत्राःनेयूयंसर्वेपिसम्यंचाः समीचीनबुद्ध

यःयेसाकंदेवरातेनसार्द्धसरातयः रातिर्धनसंपत्तिस्तयायुक्ताऽमंतोरेवरातायमदीयपुत्रस्यदेव
रातस्यधृत्सैधारणंयुष्मत्तोषणंश्रेष्ठायायुष्माकंमध्येश्रेष्ठत्वंचतस्थिरेअंगीकृतवंतः १० मूलः
अधीयतदेवरातोरिक्थयोरुभयोर्ऋषिः जह्नूनांचाधिपत्यैदैवेवेदेचगाथिनां तदेतत्सरऽऋक्शत
गाथंशौनःशेपमाख्यानं तद्धोताराज्ञेभिषिक्तायाचष्टे हिरण्यकशिपावासीनआचष्टे हिरण्यके
शिपावासीनः प्रतिगृणातिपशवोवैहिरण्यंपशव्यसैचैनंतत्समर्द्धयत्योमितिस्रचःप्रतिगरएवंतथे
तिगाथायाओमितिवैदैवंतथेतिमानुषंदैवेनचैवैनंतन्मानुषेचरोपापादेनसःप्रमुंचतितस्मा
द्योराजाविजितीस्यादध्ययजमानऽआख्यापयेतैवैतच्छौनःशेपमाख्यानंनहास्मिन्नल्पंच
नैनःपरिशिष्यतेसहस्रमाख्यात्रेदद्याच्छतंप्रतिगरित्रऽएतेचैवासनेश्वेतश्चाश्वतरीरथोहो
तुःपुत्रकामाहाप्याख्यापयेरल्लभंतेहपुत्रान्लभंतेहपुत्रान् इतिसप्तमपंचिकायांतृतीयोध्यायः ११ ३६

५७

भाष्यः पंचमींगाथामाह अधी इङ्स्मरणइतिधातुः अधीयत स्मृतिकारैर्महर्षिभिः स्मर्य्य
तेकथमितितदुच्यते अयंदेवरातोमुष्यायणत्वाद्गुभयोरजीगर्त्तविश्वामित्रयोः संबंधनीयेरिक्थे
धनेतयोर्द्वयोरिर्दृष्टा तदुभयमर्हतीत्यर्थः अजीगर्त्तस्यकूटस्थत्वविर्जह्नुसंज्ञकः तस्यवंशजातानां स
र्वेजह्नवः तेषांचाधिपत्ये स्वामित्वेदेवरातोयोग्यः तथादैवेदेवसंबंधिनियागादिकर्मणिवेदेचमंत्र
रूपेसमर्थः गाथिनामस्यपितृवंशोत्पन्नानांवतत्सर्वेषामाधिपत्येयोग्यः उक्तमुपाख्यानमुपसं
हरति तदेत् कस्मन्नंनिधारयेत्संताः सप्ताधिकनवतिसंख्याकाः ऋत्वः त्वंतः सत्वमित्यादिका
स्तिस्त्रऋचः एवमृचोशतंपरः शब्दोधिकवाचीपूर्वोक्तात्ऋक्शतात्परोधिका एकत्रिंशत्संख्याका
याभिमित्याद्यागाथायस्मिन्नाख्यानेतदेतत्परऋक्शतगाथंशुनःशेपेनदृष्टाः सप्ताधिकन
वतिसंख्यायुक्तास्तवोयाः संतिब्राह्मणेप्रोक्ताएकत्रिंशगाथाविशेषायेसंतितेःसर्वैरूपेतंहरि

४९

श्चंद्रोहवैधसइत्यादिकं सर्वंशुनःशेपविषयमाख्यानंतस्याख्यानस्यराजसूयक्रतौविनियोगंदर्शय
ति तदेवा राजसूयक्रतावभिषेचनीयाख्येकर्मणियदाराजाभिषिक्तोभवति तदानीतस्मैराज्ञेतदा
ख्यानंहोताकथयेत् तत्रेतिकर्तव्यंदर्शयति हिर होतायंशोपाख्यानंकथयति तदानीहिरण्य
कशिपौसुवर्णनिर्मितसूत्रेनिष्पादितेकशिपौसहोतोपविशेत् तदाख्यानमध्येध्वार्युश्चहिरण्य
कशिपावासीनोवक्ष्यमाणंप्रतिगरंब्रूयात् हिरण्यस्ययशोहेतुत्वाद्यशस्त्वंतथासत्येनंराजानं
यशसेवसमृद्धंकरोति अध्वर्युणाप्रयोक्तव्यंप्रतिगरविशेषंदर्शयति ॐमि होत्राप्रयुक्तायाएकै
कस्याऋचोतेध्वर्योमित्येतादृशःप्रतिगरोभवति ॐमित्येतच्छंदोरूपंदैवंदैवेरंगीकारार्थमप्रयु
ज्यते नतथेत्येतंमानुषंमनुष्याअंगीकारेतथेतिशब्दंप्रयुंजते तत्रैनप्रतिगरेणदैवेनमानुषेणचा
ध्वर्युपरेणदैवेनमानुषेणचाध्वर्युरेनंराजानंपापादेहिकादपकीर्तिरूपात्एनसोनरकहेतोश्च

५०

प्रमुंचति प्रमुक्तं करोति क्रत्वर्थत्वेनोपाख्यानं विधाय क्रतुनिरपेक्षपुरुषार्थत्वेन विधत्ते तस्माद्य
स्मादुपाख्यानं पापप्रशमने हेतु तस्माद्यजमानोपि राजसूययक्रतुरहितोपि राजा विजितीयदि विजयो
पेतः स्यात्तदानीमेतच्छौनःशेपमाख्यानं आख्यापयेत तस्मिन्राज्ञे यः कश्चिद्ब्राह्मणउपाख्यानं ब्रूया
त् तथा सति तस्मिन्राजनि अल्पं च न किंचिदपि एनः पापं न हैव परिशिष्यते सर्वपापं नश्यतीत्यर्थः
आख्यानप्रयुक्तां दक्षिणां विधत्ते सहस्रं योयमाख्याता होता तस्मै क्रत्वर्थदक्षिणामंतरेणोपा
ख्यानप्रयुक्तां दक्षिणां गोसहस्ररूपां दद्यात् प्रतिगरित्रे ध्वर्यवे गोशतं घारायै हिरण्यकशिपुरू
पे द्वे आसने स्तः एते अपि ताभ्यामेव दद्यात् अश्वतरीभ्यां संकीर्णजातियुक्ताभ्यां अधिकशक्ति
भ्यां युक्तो रथो अश्वतरीरथः स च रजतेनालंकृतत्वाच्छ्वेतः सोपि तादृशो होतुर्देयः पूर्वमयज्ञसंयु
क्तः कल्पो विजयिनो राज्ञोभिहितः इदानीं पुत्रकामानामपि सर्वेषामपि विधत्ते पुत्रेति ये पुत्रका

५०

माः संति ते ह प्रसिद्धमेतदुपाख्यानं आख्यापयेरन् ब्राह्मणमुखाच्छृणुयुरित्यर्थः ते पुत्रान्लभंते
अभ्यासोध्यायसमाप्त्यर्थः इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणे त्र
यस्त्रिंशोध्यायः ३३ मूलं: प्रजापतिर्यज्ञमसृजत यज्ञं सृष्टमनु ब्रह्मक्षत्रे ऽअसृज्येतां ब्रह्मक्षत्रे
अनु द्वय्यः प्रजा असृज्यंत हुतादश्चाहुतादश्च ब्रह्मैवानु हुतादः क्षत्रमन्वहुतादः ऽएता वै प्रजा
हुतादो यद्ब्राह्मणा ऽअथैता ऽअहुतादो यद्राजन्यो वैश्यः शूद्रस्ताभ्यो यज्ञ उदक्रामत्तं ब्रह्मक्ष
त्रे अन्वैतां यान्येव ब्रह्मण आयुधानि तैर्ब्रह्मान्वैद्यानि क्षत्रस्य तैः क्षत्रमेतानि वै ब्राह्मणायु
धानि यद्यज्ञायुधान्यथैतानि क्षत्रस्यायुधानि यदश्वरथः कवच इषुधन्व तं क्षत्र
मनन्वाप्य न्यवर्तताऽयुधेभ्यो हास्य विजमानः पराङेवैत्यथैनं ब्रह्मान्वैत्तमाप्नोत्तमाप्त्वा परस्ता
न्निरुध्यातिष्ठत्स ऽआप्तः परस्तान्निरुद्धस्तिष्ठन्ज्ञात्वा स्वान्यायुधानि ब्रह्मोपायावर्तत तस्माद्धाप्ये

59

तर्हि यज्ञो ब्रह्मण्येव ब्राह्मणे प्रतिष्ठितो येन क्षत्रमन्वागच्छत्तदृब्रवीदुपमास्मिन्यज्ञे ह्वयस्वे
ति तत्तथेत्यब्रवीत्तद्वै निधाय स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा यज्ञमु
१३ पावर्तस्वेति तथेति तत्क्षत्रं निधाय स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वाय
ज्ञमुपावर्तत तस्माद्धाप्येतर्हि क्षत्रियो यजमानो निधायैव स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्र
ह्मणो रूपेण ब्रह्म भूत्वा यज्ञमुपावर्तते ॥ २७ ॥ भाष्यः ॥ शौनःशेपप्रसंगेन या क्रिया राजक
र्तृकाः तद्विशेषविधानार्थमध्यायोत्र प्रवक्ष्यते तत्रादौ किंचिदुपाख्यानमाह प्रजा पुरा प्रजा
पतिर्ज्योतिष्टोमाख्यं यज्ञं सृष्ट्वा तदनंतरं ब्राह्मणक्षत्रियजातिद्वयं तत ऊर्ध्वं हुतादश्चाहुताद ५१
श्चेत्युभयविधाः प्रजा असृजत तत्र ब्राह्मणजातिमेवानु तद्व्यक्तिभूता हुतादः सृष्टाः क्षत्रियजाति
पंमनु तद्व्यक्तिसजातीया अहुतादः प्रजाः सृष्टाः ये ब्राह्मणाः संति ऽएताः प्रजा आर्त्विज्यस

द्भावाद्धुतशेषमदंति भक्षयंतीति हुतादः ये राजन्या वैश्याः शूद्राः एताः प्रजा आर्त्विज्याभावाद्धु
तशेषं न भक्षयंतीत्यहुतादः इत्थं यज्ञं चतुरो वर्णान्प्रजापतिः सृष्टवान् अथ सृष्टस्य यज्ञस्य
वृत्तांतमाह ताभ्यो स यज्ञस्ताभ्यः प्रजाभ्योपरक्रम्य उत्क्रम्य दूरे गच्छन् तं गच्छंतं यज्ञं ब्राह्मणजाति
क्षत्रियजाती द्वे अन्वैतां पश्चादगच्छतां ब्राह्मणस्य योग्यानि यान्यायुधानि तैः सह ब्राह्मणजा
तिर्यज्ञमन्वगच्छत् क्षत्रियस्य योग्यानि यान्यायुधानि तैः सह क्षत्रियजातिर्यज्ञमन्वगच्छत्
यानि यज्ञायुधत्वेन शास्त्रांतरे श्रूयंते स्फ्यश्च यूपश्च कपालानि चाग्निहोत्रहवणी च शूर्पं च कृष्णा
जिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला चैतानि वै दश यज्ञायुधानीति तान्येव ब्राह्मण
जातेरुचितान्यायुधानि योयमश्वयुक्तो रथो यश्च कवचः यदपि बाणयुक्तं धनुः एतान्यपि क्षत्रि
यजातेरुचितान्यायुधानि यज्ञमनुगच्छंत्यो ब्राह्मणक्षत्रियजात्योर्मध्ये ब्राह्मणजातेर्यज्ञप्राप्तिं द

र्शयति तत्र क्षत्रं क्षत्रियजातिस्तं यज्ञमनन्वाप्य अनुगमनेन प्राप्तिमलब्ध्वा तस्मादनुगमना
न्यवर्त्तत यत्तस्य क्षत्रियस्यायुधेभ्यो धनुरादिभ्यो विजमानो भीतिं प्राप्नुवन् पराङेव. न पुनरागत्तिर
हित एवेति स्मयत्नाप्य दूरेगतः अथानन्तरमेनं यज्ञं ब्रह्म ब्राह्मणजातिरन्वैत् प्रान्वागच्छत्
अनुगम्य च तं यज्ञमाप्नोति स्म आस्वाद्य च तं यज्ञमतिक्रम्य परस्तात्पुरभागे निरुध्य यज्ञगमनं
प्रतिवध्यातिष्ठत् अत्र यज्ञ आप्तः तथा ब्राह्मणजात्या प्राप्तः परस्तात्पुरभागे निरुद्धः गमना
त्प्रतिबद्धः तत्रैव तिष्ठत् ब्राह्मणस्य हस्ते सप्तकपालादीनि स्वकीयान्यायुधानि ज्ञात्वा ब्राह्म
णजातिं प्रत्युपावर्त्तन्त समीपमागच्छत यस्मादेवं तस्मादिदानीमपि यज्ञो ब्रह्मण्येव आर्त्वि
ज्ययोग्यायां ब्राह्मणजातावेव तत्रापि प्रयोगकुशलेषु ब्राह्मणेषु प्रतिष्ठितो वर्त्तते अथ क्ष
त्रियस्य यज्ञप्राप्तिं दर्शयति अंथे अथ ब्राह्मणस्य यज्ञप्राप्तेरनंतरं एतत् ब्रह्म ब्राह्मणजा

५२

५२

तिं क्षत्रं क्षत्रियजातिरन्वागच्छत् आगत्य च तद्ब्रह्म वत्येवमब्रवीत् हे ब्राह्मण मां क्षत्रियमस्मिन्यज्ञे
उपह्वयस्व अनुजानीहि मां आह्वय यज्ञेन संयोजयेत्यर्थः तदुक्तं कार्यं तथैवास्त्विति ब्राह्मणो
अब्रवीत् ० उक्त्वा च क्षत्रियायैवं बुद्धिप्रदानं कृतवान् हे क्षत्रिय तद्धै तथा सति तव यज्ञप्राप्तौ अ
पेक्षायां सत्यां स्वकीयानि धनुरादीनि आयुधानि क्वचित् स्थापनीयानि तान्यवस्थाप्य ब्राह्मणस्ये
व योग्यैः स्फ्यकपालाद्यायुधैर्ब्राह्मणस्य योग्येन त्रयाणि श्च ह्यलुत्वयुक्तेन रूपेण वेषेण च युक्तो
ब्रह्म भूत्वा ब्राह्मणसदृशो भूत्वा यज्ञं प्रत्युपावर्त्तस्वेति तत् क्षत्रं स च क्षत्रियस्तथेत्यंगीकृत्य स्व
कीयानि धनुरादीन्यायुधानि परित्यज्य यज्ञं तद्वेषेण यज्ञं प्राप्तवान् यस्मादादिस्रष्टो एवं संपन्नं
तस्मादिदानीमपि क्षत्रियो ब्राह्मणवेषेण धनुरादिरहितेन यज्ञमनुतिष्ठति इति चतुर्त्रिंशो
ध्याये प्रथमः खंडः मूलः अथातो देवयजनस्यैव याजस्तदा कुर्याद्ब्राह्मणो राजन्यो वैश्यो री

57

५३

क्षिष्यमाणः क्षत्रियं देवयजनं याचति कं क्षत्रियो याचेदिति देवं क्षत्रं याचेदित्याहुरादित्यो वै देवं
क्षत्रमादित्य एषां भूतानामधिपतिः स यदहर्दीक्षिष्यमाणो भवति तदहः पूर्वाह्ण एवोद्यंतमादित्य
मुपतिष्ठेतेदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं देव सवितर्देवयजनं मे देहि देवयज्याया इति देवयजनं या
चति स यत्तत्र याचित उत्तरां सर्पज्योतं याददामीतिहैव तदाह तस्य ह न काचन रिष्टिर्भवति देवे
न सवित्रा प्रसूतस्योत्तरोत्तरिणीं ह श्रियमश्नुतेऽश्नुते ह प्रजानामैश्वर्यमाधिपत्यं य एवमुपस्था
य याचित्वा देवयजनमध्यवसाय दीक्षते क्षत्रियः सन् अथातः इष्टापूर्तस्यापरिज्यानिः क्षत्रिय
स्य यजमानस्य स पुरस्ताद्दीक्षाया आकूतिं जुहुयाच्चतुर्गृहीतमाज्यमाहवनीये इष्टापूर्तस्याप
रिज्यान्यै २ भाष्यः क्षत्रियस्य यजनप्राप्तिमुक्त्वा देवतायजनलाभं वक्तुं प्रश्नमुत्थापयेति

५३

अण अथ क्षत्रियस्य यज्ञेच्छानंतरं यतो देवयजनमपेक्षितमतः कारणाद्देवयजनस्यैव देवा इ

त्यं तेय स्मिन्देशे स देवयजनस्तस्यैव याच्यो याचनमभिधीयत इति शेषः तत्तत्तद्देवयजने ब्रह्मवा
दिनः प्रश्नमाहुः यद्यस्मात्कारणाद्ब्राह्मणादयस्त्रयो वर्णाः क्षत्रियमभिषिक्तं राजानं प्रति देव
यजनं याचति तस्मात्राज्ञोपि देवयजनो याचितव्यः क्षत्रियो राजा कमन्यं स्वामिनं याचेदिति प्रश्नः
तस्योत्तरमाह देवं राज्ञो मनुजेषु मध्ये स्वाम्यंतराभावेपि देवसंबंधिक्षत्रियजातेः स्वामित्वात्त
त्रैव याचनमुचितमित्युत्तरमाहुः यो यदादित्योस्ति असावेव देवं देवसंबंधि क्षत्रं क्षत्रियजा।
ति अयमादित्य एषां प्राणिनां तमोनिवारणेनाधिष्ठाता पालयिता ततः स्वामित्वात्तत्समीपे या
चनमुचितं तस्य प्रकारं दर्शयति स य स राजा यस्मिन्नेवाहनि दीक्षितुमुद्युक्तः तस्याह्नः पूर्वा
ह्णकाले एवोद्यंतमूर्ध्वं गच्छंतमादित्यमृग्यजुर्भ्यामुपतिष्ठेत् इदं श्रेष्ठमित्यृचेः प्रतीकं देवसवि
तरित्यादिकं यजुषः हे देवसवितर्देवयज्यायै देवसंबंधियागार्थं मे मह्यं देवयजनं देवोचित

५४

यागदेशं देहि इत्यनेन प्रकारेण देशं याचित्वा क्षत्रोपस्थानं यजुषा याचनमिति व्यवस्थया इष्ट
व्यं राज्ञा याचितस्यादित्यस्य प्रत्युत्तरं संपादयति सय आदित्यो यद्यपि तत्र तदानीमनेन रा
ज्ञा याचितः सन् उत्तरां यत्र स्वयं तिष्ठति तस्मादनंतरं नाविनी दिशं प्रति सर्पति गच्छेत् त
दानीं तत्तेन सर्पणेनो तथा ददामीत्येवमुत्तरमाह ब्रूते लोकेऽपि दृष्टः पुरुषो वाचावाद
स्तु शिरः श्चालनादिना चोत्तरं प्रयच्छति तद्वदत्रापि सर्पणमेवोत्तरमस्तु सर्पणस्याभिप्रा
यं ॐ तथा ददामीत्यनेन कथितः ॐ त्वदुक्तमंगीकरोमि तथा तेनैव प्रकारेण देवय
जनं ददामि तामेतो देवयजनयाच्ञां प्रवृत्तां सति तस्य यः पुमान् क्षत्रियः स्वयं राजा सन् रण
वगृवादिसमुपस्थाय यजुषा याचित्वा ततो देवयजनं निश्चित्य दीक्षते दीक्षां प्राप्नोति ते
स्य राज्ञः सवितारेवेन प्रसूतस्यानुज्ञातस्यारिष्टि हिंसा कांचन काचिदपि न भवति

५४

न केवलं हिंसाराहित्यं किंतु उत्तरोत्तरिणीं दिने दिने वर्द्धमानां श्रियमश्नुते प्राप्नोति किंच प्रजानां
सर्वासामैश्वर्यमीश्वरत्वं नियमनसामर्थ्यं आधिपत्यमधिष्ठाय पालयितृत्वं तत्तद्योगक्षेमसंपा
दनमश्नुते प्राप्नोति इति चतुस्त्रिंशोध्याये द्वितीयः खंडः तस्यैव क्षत्रियस्य होमं विधत्ते अथा
अथ देवयजनिश्चयानंतरं यस्मादनुष्ठेयस्येष्टापूर्तस्य अपरिज्यानिर्विनाशाभावोपेक्षितः अतः
कारणाद्यजमानस्य क्षत्रियस्य राज्ञः इष्टापूर्तापरिज्यानिसंज्ञको होमोभिधीयते इति शेषः इ
ष्टापूर्ते शास्त्रार्थैः पूर्वाचार्यैर्दर्शितः वर्णाश्रमोन्वयी धर्म इष्टं पूर्तमथेतरत् प्रपातटाकादिरूपं
तच्च सर्वत्र दृश्यते स्मार्तं पूर्तं श्रौतमिष्टं इति केचिदिहोचुरिति सराजा दीक्षायाः पूर्वं आहुतिं
जुहुयात् चतुर्गृहीतमाज्यं इत्यं आहवनीयो होमस्थानं अनुष्ठेयस्येष्टापूर्तस्य फलपर्यवसा
यित्वलक्षणो विनाशाभावः १ मूलं: पुनर्न इंद्रो मघवा ददातु ब्रह्म पुनरिष्टं पूर्तं वात्स्वाहेत्य

५५

थानुबंध्यायेसमिष्टयजुषामुपरिष्टात्पुनर्नोअग्निर्जातवेदादद्दातु तत्रंपुनरिष्टंपूर्तं दात्स्वा
हेतिसेषेष्टापूर्त्तस्यापरिज्यानिः क्षत्रियस्ययजमानस्यपदेतेः आकूती तस्मादेतेहोतव्ये तदुह
स्माहसौजातऽआराल्हिरनीतपुनर्वएएंवाएतद्यदेतेऽआकूतीइतियथाहकामयेतनथेत्वेकु
र्वीयऽइतोनुष्ठासनंकुर्यादितिमेत्वेवजुहुयाब्रह्मप्रपद्येब्रह्ममाक्षत्राद्गोपायतुब्रह्मणेस्वा
हेतितत्वदिनीब्रह्मवाऽएषप्रपद्यतेयोयज्ञंप्रपद्यतेब्रह्मवैयज्ञोयज्ञादुहवाएषपुनर्जायते
योदीक्षतेतंब्रह्मप्रपन्नंक्षत्रंनपरिजिनाति ब्रह्ममाक्षत्राद्गोपायत्वित्याहयथेनंब्रह्मक्षत्रा
द्गोपायेद्ब्रह्मणेस्वाहेति तदेनत्प्रीत्प्रीणाति तदेनत्प्रीतंक्षत्राद्गोपायति ३ भाष्यः प्रयोज
नंहोमेमंत्रंदर्शयतिपुन पुनर्नइत्यादिकमृचःप्रतीकंब्रह्मेत्यादिकंयजुः ब्रह्मवेदरूपोमंत्रः
इष्टंपूर्तं यथोक्तलक्षणं पुनर्दात्भूयोभूयोददातु तदर्थमिदंस्वाहाहुतमस्तु दीक्षणीये

५५

ष्टेः पूर्वकालीनं होमंविधायानुबंध्याख्यपशोरुत्तरकालीनंहोमंविधत्ते अथा अथप्रा
चीनहोमकथनानंतरं उच्यतइतिशेषः अनुबंध्याये अनुबंध्याख्यपशोः संबंधीनियानि
त्रीणिसमिष्टयजूंषिसंतितेषामुपरिष्टात्जुहुयादितिशेषः पुनर्नइत्यृचःप्रतीकंइयंपूर्वो
क्ताचेत्युग्द्वयं शाखांतरंगतं क्षत्रंक्षत्रियजातिरिष्टंपूर्तंचपुनर्दात्भूयोददातु तदर्थंस्वाहुत
मिदमस्तु पूर्वोत्तरकालीनमाहुतिद्वयंप्रशंसतिसेषे योयंक्षत्रियोराजायजमानः तत्रस्यएतेपू
र्वोत्तरकालीनेआहुतीविधेयेते सैषाहुतिक्रियाइष्टस्यपूर्त्तस्यचापरिज्यानिरविनाशहेतुः तस्मा
त्कारणादेतेउभेआहुतीहोतव्ये इतिचतुर्स्त्रिंशोध्यायेतृतीयःखंडः अथप्रकारांतरेणा
हुतिद्वयंविधत्ते तदुहतत्रैवपूर्वोक्तहोमस्थानेसौजातनामकःकश्चिदृषिः सवाराल्हनाम
कस्यपुत्रएवमुवाच कथमितिउच्यते एतेवक्ष्यमाणेआहुतीइतियदस्तितदेवदजीतपुनर्व

रपि येन ष्टम प्राप्तं वायद्धस्तु तदेतरकीजीतं तस्य पुनरपि च नसाधनं प्राप्तिकारणं नजीतपुनर्व
५६ रपि वक्ष्यमाणमाकूतिद्वयमेवन्नामक मित्यर्थः इतियदेतत्सोजातस्य मंतरे वयथेत्यादि
नाव्रज्ञास्यतोयः पुमानितः सोजातवाक्यादनुज्ञासनमुपदिष्टमनुष्ठानं कुर्यात् सपुमानस्य
प्यायेनैव प्रकारेण सिद्धं फलं उद्दिश्यैतकुर्यात् एतदनुष्ठानेन काम्यमानं फलं सिध्यति
तस्मात्कारणादिमे आकूतीजुहुयान्नतु पूर्वे तत्रदीक्षणीयेष्टेः प्राचीनहोममंत्रं दर्शयति ब्रह्म
ब्रह्म ब्राह्मणजातिं प्रपद्ये रक्षकतया प्राप्नोति ब्रह्मसा ब्राह्मणजातिमां क्षेत्रात् क्षत्रियजाते
र्गोपायतु पालयतु ब्रह्मणे ब्राह्मणजातये स्वाहुतमिदमस्तु अनेन मंत्रेण हवनीये चतुर्ग ५७
हीतमाज्यं जुहुयात् अस्याहुतेः श्रुत्यर्थं दर्शयति तत्र सर्वेपियाज्ञिकाः पूज्य
होमप्रसंगेन तदा तदा तत्तदित्येवमेतदेवानुष्ठानमुदाहरंति प्रजापतौ

सानुनासिकश्रुतिः अथमंत्रतात्पर्यं दर्शयति ब्रह्मयः पुमान्यज्ञं प्रपद्यते प्रारभते एषपुमान्ब्र
ह्मैव ब्राह्मणजातिमेव प्रारभते ब्रह्मैव ब्राह्मणजातिरेव यज्ञः तथाजात्या साध्यत्वात् एवं सतियः
पुमान्दीक्षते दीक्षां प्राप्नोति एषपुमान् पूर्वं जातोपि यज्ञाद्दहवै अनुष्ठीयमानाद्यज्ञादेवपुनर
पि जायते ब्रह्मस्वरूपं नं यज्ञोपक्रमेण यज्ञस्वरूप ब्राह्मणजातिं प्रपन्नं तं यजमानं क्षत्रं क्षत्रियजाति
र्नपरिजिनीति नैवहिनस्ति एतावता ब्रह्म प्रपद्य इत्यस्य मंत्रपादस्य तात्पर्यं दर्शयति यस्तुमध्य
मोमंत्रभागो ब्रह्मणा त्वत्राणोयायत्विस्येवं ब्रूते तस्मिन्भागे ब्राह्मणजातिरेनं यजमानं क्षत्रिय
जातेर्गोपायति पायेदक्षेत्तत्तथास मध्यम भागो ब्रूते ब्रह्मणे स्वाहेत्येतावदृश्यो यस्तृतीयभागः
तत्तेन भागेन ब्रह्म ब्राह्मणजातिं प्रीणाति तर्पयति तदेनद्ब्रह्मप्रीतं सत् यजमानं क्षत्रियजाते
र्गोपायति रक्षति २ मूलं त्यथान्वं ध्यायेस मिश्रय यजुषामुपरिष्टात् क्षत्रं प्रपद्ये क्षत्रं माब्रह्म

णो पा गोणायतु क्षत्राय स्वाहेति तत्त दिती क्षत्रं वा एष प्रपद्यते यो राष्ट्रं प्रपद्यते क्षत्रं हि राष्ट्रं क्ष
त्रं प्रपन्नं ब्रह्म न परिजिनाति क्षत्रं मा ब्रह्मणो गोपायत्वित्याह यथैनं क्षत्रं ब्राह्मणो गोपायेत् क्ष
त्राय स्वाहेति तदेन त्प्रीणाति तदेनत्प्रीतं ब्रह्मणो गोपायति सैषेष्टा पूर्वत्स्यैवोपरिष्टान्निः क्ष
त्रियस्य यजमानस्य परस्तादाहुती तस्मादेते एव होतव्ये अथैन्द्रो वै देवतया क्षत्रियो भवति
त्रैष्टुभश्छंदसा पंचदशस्तोमेन सोमो राज्येन राजन्यो बंधुना सह दीक्षमाण एव ब्राह्मणताम
भ्युपैति यत्कृष्णाजिनमध्यूहति यद्दीक्षितव्रतं चरति यदेनं ब्राह्मणा अभिसंगच्छंते तस्य ह दी
क्षमाणस्येंद्र एवेंद्रियमादत्ते त्रिष्टुब्वीर्यं पंचदशस्तोम आयुः सोमो राज्यं पितरो यशस्कीर्त्तिमन्यो
वा अयमस्मद्भवति ब्रह्म वा अयं भवति ब्रह्म वा अयमुपावर्त्तत इति वदंतः स पुरस्ताद्दीक्षाया आ
हुतिं हुत्वाहवनीयमुपतिष्ठेत नेंद्राद्देवताया एमि न त्रिष्टुभश्छंदसो न पंचदशात्स्तोमान्न सो

माद्राज्ञो न पित्र्याद्बंधोर्मामिमः इंद्रः इंद्रियमादित मा त्रिष्टुब्वीर्यं मा पंचदशस्तोम ऽ आयुर्मा सोमो
राज्यं मा पितरो यशस्कीर्त्तिं सहेंद्रियेण वीर्येणायुषा राज्येन यशसा बंधुनाग्निं देवतामुपैमि गाय
त्रीं छंदस्त्रिवृतं स्तोमं सोमं सजानं ब्रह्म प्रपद्ये ब्राह्मणो भवामीति ४ भाष्यः पूर्वकालीनं हो
मं विधायोत्तरकालीनं होमं विधत्ते अथा पूर्ववद्व्याख्येयं तस्मिन् होमे मंत्रं तदीयं तात्पर्यं च
दर्शयति क्षत्रं पालनीयो देशो राष्ट्रं तच्च क्षत्रियेण पालनीयत्वात् क्षत्रस्वरूपं अन्यत्सर्वं पूर्व
वाक्यवद्व्याख्येयं तदेतदाहुतिद्वयं प्रशंसति सैषेति पूर्वोक्ताहुतिद्वयविषयवाक्यं व्याख्ये
यं एवकारः पूर्वोक्ताहुतिद्वयमात्रस्यार्थः एतदेव सौजातनाम्नस्य महर्षेर्मतं प्रशस्तं इति च तु
स्त्रिंशोध्याये चतुर्थः खंडः क्षत्रियस्याहवनीयोपस्थानं विधातुं प्रस्तौति अथेति अथ होमक
रणानंतरमुपस्थातव्य इति शेषः योयं क्षत्रियोस्ति सोयं देवतयाऐंद्रो वै इंद्रसंबंध एव ति देवतानां

मध्ये इंद्रः क्षत्रियस्याभिमानी देवतेत्यर्थः तथा छंदसो त्रैष्टुभः छंदसां मध्ये त्रिष्टुबेतदभिमानिनी
स्तोमानां मध्ये पंचदश एतदभिमानिनी राज्येन निमित्तेनायं सोमः रूपः सोम एव तदीयराज्याभि
५८ मानी बंधुनापि तृपितामहादिबंधुवर्गेण राजन्यो राजजातीयः एवं सति सहस खलु क्षत्रियो दी
क्ष्यमाण एव दीक्षां स्वीकुर्वन्ब्राह्मणत्वाजातिं प्राप्नोति कथमिति तदुच्यते ब्राह्मणयजमानव
त् कृष्णाजिनमध्यूह त्याछादयतीति यदस्ति तथा दीक्षितव्रतं मुष्टिबंधनवाङ्नियमादिकं
चरतीति यदस्ति तथा ब्राह्मणा ऋत्विजो भूत्वा एनं क्षत्रियमत्रिनः संगच्छंते संगता भवंतीति
यदस्ति तेन सर्वेण संस्कारेणापक्षत्रियो ब्राह्मण्यं प्राप्नोति तस्य हुतादन्नाद्यस्यैव क्षत्रियस्य दी ५८
क्षमाणस्य दीक्षां प्राप्नुवत इंद्रियं चक्षुरादिक्षपाटवं इंद्र एवादत्तोपहरति तथा वीर्यं युद्धादिसा
मर्थ्यं त्रिष्टुबपहरति पंचदशस्तोम आयुरपहरति सोमो राज्यमपहरति पितरो यशः कीर्तिमप

हरंति ऐहिकं युद्धादिविषयकं यशः आमुष्मिकाय ज्ञविषया कीर्तिरेवमपहरतां इंद्रत्रिष्टुबा
दीनां को भिप्राय इति सो भिधीयते अयं क्षत्रियो स्मदिंद्रादिभ्यो न्य एव स्वतंत्र एव भवति पूर्वम
स्मदधीनः सन् इदानीं यागं कुर्वन् ब्रह्म वै ब्राह्मण एव अयं भवति कथमिति तदुच्यते अयं क्ष
त्रियो ब्रह्म वै ब्राह्मणजातिमेव कृष्णाजिनाछादनादिभिरुपेत्य वर्तते तथा सत्यस्मदपेक्षामंतरे
योणैव सर्वपुरुषार्थसाधनसमर्थत्वात् अस्मदधीनतां परित्यज्यात्य एव स्वतंत्रो भवतीति स्वा
भिप्रायं परस्परं वदंतः सर्वमप्येतदीयं अपहरंति तस्योपद्रवस्य शांत्यर्थमुपस्थानं विधत्ते स
पु दीक्षणीयेष्टेः पूर्वोक्तामाहुतिं हुत्वा तत्र आहवनीयं वक्ष्यमाणेन मंत्रेणोपतिष्ठेत्तं मंत्रं
दर्शयति नेंद्रो क्षत्रियोहं इंद्ररूपायाः मदीयदेवतायाने मिष्टथा भूतो न गच्छामि तथाप्प
भिन्नानिस्पः छंदस्तोमराजबंधुभ्यो नापगच्छामि अयमिंद्रो संदीयमिंद्रियं मादितमापहरतु

57

तथा त्रिष्टुबाद्योवीर्यादीस्तापहरं तु तेषामिंद्रादीनां अनुग्रहाद् हइंद्रियादिभिः सहावस्थि
तोभूत्वा तत्पालनसमर्थः ४ मूलः तस्य हतेंद्र इंद्रियमादत्ते नत्रिष्टुब्वीर्येण पंचदशस्तोमः
आयुर्न सोमो राज्यं न पितरो यशस्कीर्तिं यः एवमेतामाहुतिं हुत्वाहवनीयमुपस्थाय दीक्ष
ते क्षत्रियः सन् अथाग्नेयो वै देवतया क्षत्रियो दीक्षितो भवति गायत्रश्छंदसा त्रिवृत्स्तोमेन
ब्रह्मणो बंधुना स होदवस्यन्नेव क्षत्रियातामभ्युपेत्य तस्य होदवस्यतोऽग्निरेव तेजः आदत्ते
गायत्री वीर्यं त्रिवृत्स्तोम आयुर्ब्रह्मणा ब्रह्म यशस्कीर्तिमन्यो वा अयमस्मद्भवति क्षत्रं वा
अयं भवति क्षत्रं वा अयमुपावर्त्तत इति वदंतः सोमूलं ध्यायेस मिष्टयजुषामुपरिष्टाद्धुत्वा
हुतिमाहवनीयमुपतिष्टेत नाः ग्ने देवतायाएमि तगायत्र्याश्छंदसो तत्रिवृतःस्तोमान्न ब्र
ह्मणो बंधोमा मेग्निस्तेजः आदित मां गायत्री वीर्यमा त्रिवृत्स्तोमः आयुर्मा ब्राह्मणा ब्रह्म

५९

५९

यशस्कीर्तिं स ह तेजसा वीर्येणायुषा ब्रह्मणा यशसा कीर्त्यैंद्रं देवतामुपेमि त्रिष्टुभं छंदः पंचद
शस्तोमं सोमं राजानं क्षत्रं प्रपद्ये क्षत्रियो भवामि देवाः पितरः पितरो देवा योस्मि स सन् यजे स्वं म
इदमिष्टं स्वं पूर्त्तं स्वं श्रांतं स्वं हुतं तस्य मेयमग्निरुपग्निरुपद्रष्टा यं वायुरुपश्रोता सौ वादित्यो
नुख्याते दमहं य एवास्मि सोस्मीति तस्य ह नाग्निस्तेज आदत्ते न गायत्री वीर्यं न त्रिवृत्स्तोमः
आयुर्न ब्राह्मणा ब्रह्म यशस्कीर्तिं य एवमेतामाहुतिं हुत्वा हवनीयमुपस्थाने दवस्यति क्ष
त्रियः सन् ५ १२ भाष्यः अग्निं देवतामुपैमि तथा गायत्रीवृत्स्तोमब्राह्मणजातीः प्रपद्ये
प्राप्नोमि तेषामग्न्यादीनामनुग्रहात् वेतोसु ब्राह्मणो भवामि अनेन मंत्रेण यदुपस्थानं तत्स्वरूपं
सति तस्य यः पुमान् क्षत्रियजातियुक्तः सन् उत्क्रमेण दीक्षायाः प्राची नामाहुतिं हुत्वाते
द्रादित्यादिमंत्रेण हवनीयमुपस्थाय पश्चाद्दीक्षां प्राप्नोति तस्य क्षत्रियस्येंद्रियादीनिंद्रादयो ना

६०

पहरंति इतिचतुस्त्रिंशोध्यायेपंचमःखंडः पूर्वहोमानंतरमुपस्थानंविधायोत्तरहोमादूर्ध्वमुप
स्थानंविधातुंप्रस्तौति अथा अथपूर्वोपस्थोनानंतरंउत्तरोपस्थानंवक्ष्यतइतिशेषः अयं
यजमानःपुराक्षत्रियोपिइदानींदीक्षितःसन्ब्राह्मण्यंप्राप्यदेवताग्निःसंबद्धोभवति
अग्निरस्यब्राह्मणस्यस्वामी एवंगायत्रीत्रिवृद्ब्राह्मणजातिसंबंधोदृष्टः तादृशइदानीं
ब्राह्मणःसन्नुदवस्यंनेउदवसानीयेष्ट्यासोमयागंसमापयन्नेवब्राह्मण्यंपरित्यज्य
क्षत्रियत्वंप्राप्नोति तस्मादुदवसानीयेष्टिंकुर्वतोस्ययजमानस्यतेजःप्रभृतीनस्मा
दयोपहरंति ब्रह्मवर्चस्तरध्ययनमेहिकंयशः तदनुष्ठाननिमित्तामुष्मिकीकीर्त्तिः
अपहरतामग्न्यादीनांकोभिप्रायंसोभिधीयते अयमिदानींब्राह्मणःसन्नस्मदन्यः
स्वतंत्रोभवति अयंक्षत्रंवैक्षत्रियएवभवति तदपिकथमितिनेतत्उच्यते ॥

६०

अयंयागकालेब्राह्मणःसन्यागादूर्ध्वंब्राह्मण्यंपरित्यज्यस्वकीयांक्षत्रियजातिमेवोपेत्यवर्त्तते
तस्मादस्मास्मत्तोन्यत्वमितिपरस्परंवदंतोग्न्यादयःतेजआदीनपहरंति तच्छांत्यर्थमुपस्थानं
विधत्ते सोनु पूर्ववद्धारयेयेये तत्रोपस्थानंमंत्रमाह नाग्ने अत्रनाग्निर्देवतायाइत्यादिक्षत्रि
योत्रवामोस्तंतं एवंमंत्रवद्व्याख्येयं हेदेवाअग्न्यादयःपितरापालकायूयंस्थएवतेतिशेषः पित
रोदेवाइतिपुनर्वचनमादरार्थं नवदनुग्रहात् कृष्णाजिनाच्छादनादिसंस्कारेणयोब्राह्म
णोस्मियज्ञसमाप्तिपर्यंतंसएवब्राह्मणःसन्यजेयागंकुर्वेमेनमइदंमिष्टंश्रोतंकर्मस्वंस्वा
धीनंजातंतथाश्रांतंश्रमरूपंतपोपिस्वंस्वाधीनंजातंकुतमन्यदपिकाम्यहोमादिकंस्वंस्वा
धीनंजातं तस्मातादृशस्येष्टोहर्त्तारियुक्तस्यमेमामायंभूलोकावस्थितोग्निरूपद्रष्टासमीपे
स्थित्वासाक्षित्वेनावलोकयिता अयमंतरिक्षादवस्थितोवावायुरूपश्रोता तस्यानेर्गुरवा

५७

दस्माहत्वां तं श्रोष्यति असौ फलोकावस्थित आदित्यस्तं वायुमनुपश्चात् रम्यातास्वर्गलो
केकथयिष्यति इदं कर्माहं कृतवानिति एवं फलपर्य्यंतकर्म्मणि समाप्ते समितिक्रम्योपक्र
६१ मात्पूर्वं ध एव क्षत्रियोऽस्मि स एवोर्ध्वं क्षत्रियो भूत्वामिष्टामेति अनेन मंत्रेण यदुपस्थानं त
त्स्वग्नं सेति तस्य पूर्वं तस्य हनेंद्र इंद्रियमित्यादि यद्वाक्ययुक्तं तद्व्याख्येयं इति चतुस्त्रिं
न्नोध्याये षष्ठः खंडः ५ मूलं: अथातो दीक्षायविदनस्यैव तदाहुर्य ब्राह्मणस्य दीक्षित
स्य ब्राह्मणो दीक्षिष्टेति दीक्षामावेदयंति कथं क्षत्रियस्यावेदयेदिति यथैवैतद्ब्राह्मणस्यदी
क्षितस्य ब्राह्मणो दीक्षिष्टेति दीक्षामावेदयंत्येवमेवैतत्क्षत्रियस्यावेदयेत् पुरोहितस्यार्षे ६२
येणेति तत्तदितिनिधायवाऽएषः स्वान्यायुधानि ब्रह्मणएवायुधे ब्रह्मणो रूपेण ब्रह्मभू
त्वायतमुपावर्त्तंत तस्मात्तस्य पुरोहितस्यार्षेयेण दीक्षामावेदयेयुः पुरोहितस्यार्षेयेण

प्रवरं प्रवृणीरन् २२ अथातो यजमानभागस्यैव तदाहुः प्राश्नीयात् क्षत्रियो यजमानभागं
न प्राश्नीयात् इति यत्प्राश्नीयादहुताहुतं प्राशनस्य पापीयान्स्याद्यन्न प्राश्नीयाद्यज्ञाद्दात्मान
मंतरियाद्यज्ञो वै यजमानभागः ६ भाष्यः क्षत्रियस्य दीक्षितत्वावेदने मंत्रे संदेहात्स्वश्न
मुन्नावयति अथा अथदीक्षानंतरं देवानां मनुष्याणां चायेयत एतदायदीक्षाकथनीया
अतः कारणाद्दीक्षाया आवेदनस्य प्रकटीकरणस्यैव कश्चिन्निर्णय उच्यते तत्र तस्मिंनावे
दने संदिहाना ब्रह्मवादिनः प्रश्नमाहुः ब्राह्मणस्य दीक्षाया ऊर्ध्वमदीक्षिष्टायं ब्राह्मण
इति मंत्रेण दीक्षाप्रख्यापनीया तथा च तैत्तिरीया आमनंति अदीक्षिष्टायं ब्राह्मण इति
त्रिरुपांश्वाह देवेभ्य एवैनं प्राह त्रिरुच्चैरुभयेभ्य एवैनं देवमनुष्येभ्यः प्राहेति एवं सति क्ष
त्रियस्य दीक्षावेदने किमस्मिन्मंत्रे ब्राह्मणशब्दः क्षत्रियपरत्वेनोहनीयः आहोस्विदवि

६२

कृतएवपठनीयइतिप्रश्नाभिप्रायः तत्रोत्तरमाह यथे अत्रत्राष्टोनोहितम्यः अविकृतएव
ब्राह्मणराष्ट्रः क्षत्रियदीक्षावेदनेपिप्रयोक्तव्यः यदिब्राह्मणप्रवरोपेक्षितः तदानींपुरो
हितेन्यः ब्राह्मणस्यसंबंधिनार्षेयेणप्रयोगःकर्तव्यः तथाचापस्तंबः क्षत्रियवैश्ययोरपि
ब्राह्मणराष्ट्रैनेवावेदनं दर्शयति अदीक्षिष्टायंब्राह्मणोसावमुष्यपुत्रोमुष्यपौत्रोमुष्य
नप्तामुष्याःपुत्रोमुष्याःपौत्रोमुष्यानप्तेतिब्राह्मणोवाएषजायतेयोदीक्षतेतस्मा
त् राजन्यवैश्यावपि ब्राह्मणइत्येवावेदयतीति इदंचास्यावेदनस्य
पूज्यतांदर्शयति तत्तदितीति पूर्वेवद्याख्येयं ब्राह्मणत्वेनावेदनमुपपाद
यति निधायवेति स्वान्यायुधानिधनुरादीनि ब्राह्मणआयुधानिस्फ्यकपाला
दीनियस्मात्स्वायुधपरित्यागपूर्वकं ब्रह्मायुधस्वीकारेणब्राह्मणोभूत्वा।

६२

यज्ञंप्राप्तवान् तस्मात्तस्ययजमानस्यपुरोहितसंबंधिनागोत्रेणदीक्षावेदनं तथाप्रवरोपिवि
ज्ञेयः इतिचतुस्त्रिंशोध्यायेसप्तमःखंडः दर्शपूर्णमासयोर्यजमानम गप्राशनविहितं त
दत्रदीक्षणीयादीष्टिषुचोदकप्राप्तंक्षत्रियस्यतत्प्राशनेनिर्णयंवक्तुंविचारमवतारयति अ
था दीक्षावेदननिर्णयानंतरं दीक्षणीयादीष्टयोयतोबुद्धिस्थाः अतःकारणात्तस्ययजमा
नभागस्यैवप्रकारविशेषउच्यतइतिशेषः तत्तस्मिन्भागेब्रह्मवादिनोविचारमाहुः क्ष
त्रियोब्राह्मणवत्किंयजमानभागंप्राश्नीयात् उतनेतिविचारार्थंश्रुतिद्वयंपक्षद्वयदोषमु
द्भावयति यस्त्राकृतमत्तीतिकृतात् ताद्दृशेनभवतीत्यकृतात् अथैताअकृतादोयद्रा
जन्योवैश्यःस्मृइति पूर्वमुक्तं अतोयंक्षत्रियोकृतात्योग्यतारहितोयदिकृतशेषंप्रा
श्नीयात् तदानींपापीयान् असंतपापयुक्तोभवेत् अप्राशनपक्षेतुयज्ञादात्मानमंतरिया

(61)

विच्छिंद्यात् यजमानभागस्य यज्ञहेतुत्वेन यज्ञस्वरूपत्वात्तद्भागराहित्ये यज्ञान् विच्छिन्नो
भवति ६ मूलं: सब्राह्मणेपरिहरत्य:पुरोहितायतनंवाऽ एतत्क्षत्रियस्य यद्ब्रह्मार्द्धात्मो

६२

हवा एषक्षत्रियस्य यत्पुरोहित उपाहपरोक्षेणैव प्राशितरूपमाप्नोति नास्य प्रत्यक्षं भक्षितो
भवतियज्ञः उहवाऽ एषप्रत्यक्षं यद्ब्रह्मा ब्रह्मणिहि सर्वोयज्ञः प्रतिष्ठितो यज्ञे यजमाने यज्ञः
एवतद्यज्ञमप्यसंजीतियथाप्स्वापोयथाग्नावग्निं तद्वै नातिरिच्यते तदेनं न हिनस्ति तस्मा
त्स ब्रह्मणेपरिहृत्यो प्रैहैकजुह्वति प्रजापतेर्विभान्नाम लोकस्तस्मिंस्त्वादधामि सह यजमा
नेनस्वाहेति तत्तथा न कुर्याद्यजमानो वै यजमानभागो यजमानं ह सोऽग्नौ प्रवृणक्ति यऽएनं

६२

तत्र ब्रूयाद्यजमानमग्नौ प्रावार्क्षीः प्राणास्याग्निः प्राणान्धक्ष्यति मरिष्यति यजमानऽ इतिशश्व
त्तथास्यात्तस्मात्तस्य प्राशं नेयाद्वा प्राश्नीयात् इति सप्तमपंचिकायां चतुर्थोध्यायः ७ ३२

परिहर्तुं

भाष्य: उक्तदोषद्वयं पक्षांतरमाह सयजमानभागस्त्विर्विवेषाय ब्रह्मणे परिहर्त्तव्य: प
रितः सर्वात्मना समर्पणीयः तत्समर्पणे दोषद्वयराहित्यं दर्शयति पुरो त्त्विय पोब्रह्मेति
यदस्ति एतत्क्षत्रियस्य पुरोहितायतनं तत्पुरोहितस्थानं पुरोहितो योस्ति एषः क्षत्रियस्यार्द्धात्मो
हवै अर्द्धदेह एव उहवा इति निपातसमूहोवधारणार्थः अर्द्धशरीरस्थानीयपुरोहितरूपे
ण ब्रह्मणा तस्मिन् भागे भक्षिते सति परोक्षेणैव व्यवधानेनैव प्राशितरूपं प्राशितसादृश्यं
प्राप्नोत्येव अह शब्द उपशब्दश्च मिलितत्वावधारणार्थो अस्य क्षत्रियस्य प्रत्यक्षमव्यवधा
नेन स्वमुखेन भागो भक्षितो न भवति एवं सति व्यवधानेन भक्षितत्वाद्यज्ञांतरायो न भविष्य
ति स्वमुखेन भक्षणाभावादयं पापीयानपि न भविष्यति ब्रह्मणस्तद्भागप्राशनं प्रशंसति
यज्ञायो ब्रह्मास्ति एष प्रत्यक्षमव्यवधानं यथा भवति तथा यत्तदु ह वै यज्ञस्वरूप एव तःसा

६४

धत्वात् किंच ब्रह्मण्येव सर्वो यज्ञः प्रतिष्ठितः वेदत्रयवैकल्यपरिहर्तृत्वेन ब्रह्मणोभिषग्भू
पत्वस्योक्तत्वात् तस्मिंश्च प्रतिष्ठिते यज्ञे यज्ञे यजमानोपि प्रतिष्ठितः तत्फलभागित्वात् ए
वं सति तस्मिन्नेन भागप्रदानेन यज्ञ एव ब्रह्मस्वरूपेण भागरूपं यज्ञमध्यस्य जंति सम्यक्प्रक्षिपंति
तत्र दृष्टांतः यथा लोके आप्सु प्रक्षिप्ता आपः एकत्वेन संसृज्यंते यथा वाग्नौ प्रक्षिप्तमग्नि
मेकीभूतं पश्यामः तथा तद्दैव ब्रह्मणा प्राशितं हविर्नातिरिच्यते अतिरिक्तं न भवति किं
तु यज्ञरूपे ब्रह्मण्यसहैकीभवति तदेकीभूतं हविरेनं क्षत्रियं न हिनस्ति न बाध
ते तस्मात्स यजमानभागो ब्रह्मणे समर्पणीयः पक्षांतरमुपन्यस्य दूषयति अ
ग्नौ एके याज्ञिकाः ते यजमानभागं परं अग्नौ जुह्वति तत्र प्रजापते रित्यादिको
मंत्रः प्रजापतेः संबंधी यो लोकः तस्य विज्ञानिस्यनं नामधेयविशेषेण भातीति ।

६४

विशेषेण भातीति तमृतुस्तिनः यजमानभागयजमानेन सह त्वां तस्मिंल्लोके दधामि प्रक्षिपामि
तदर्थमिदं स्वाहुतमस्तु अनेन मंत्रेण यद्धोमानुष्ठानमस्ति तत्तथा न कुर्यात् यजमानभा
गस्य यजमानस्वरूपत्वेन तस्य भागस्य होमे स होमप्रकर्ता यजमानमेवाग्नौ प्रवृणक्ति प्रवृक्तं
दग्धं करोति तत्र तदानीं यः शत्रुरागत्य एनं कर्तारं ब्रूयाच्छंये न कथमिति तदुच्यते हे होमकर्त
स्त्वं यजमानमग्नौ प्रावाक्षीः प्रवृक्तवान् दग्धवानसि अस्य यजमानस्य प्राणानग्निः प्रकर्षे
ण धक्ष्यति स यजमानो न जिष्यतीति स शापो वक्तव्यं तथैवस्यात् तस्मात्तस्य होमस्य प्राणमिच्छा
भिपि नेयान्न प्राप्नुयात् अस्यासोध्यायसमाप्त्यर्थः इति सायणाचार्यविरचिते माधवीये वे
दार्थप्रकाशे ऐतरेयब्राह्मणे चतुस्त्रिंशाध्यायेष्टमः खंडः समाप्तश्चाध्यायः ७ मूलं
विश्वंतरो ह सोषद्मनः श्यापर्णान् परिचक्षाणो विश्यापर्णं यज्ञमाजह्रे तद्धानुबुध्य श्यापा

६५

र्णीस्तं यज्ञमाजग्मुस्ते ह तदन्तर्वेद्यासांचक्रिरे तान्ह दृष्ट्वोवाच पापस्य वा इमे कर्मणः कर्त्तार आ
सते पूताये वाचोवदितारो यच्छ्यापर्णा इमानुत्थापयतेमे मेऽन्तर्वेदि मासिषतेति तथेति तानुत्था
पयांचक्रुस्ते होत्थाप्यमाना रुरुचिरे ये तेभ्यो भूतवीरेभ्योऽसितमृगाः कश्यपानां सोमपीथमभिजि
ग्युः पारिक्षितस्य जनमेजयस्य विकश्यपे यज्ञे तैस्ते तत्र वीरवन्त आसुः कः स्वित्सोऽस्माकास्ति
वीरो य इमं सोमपीथमभिजेष्यतीत्ययमहमस्मि वो वीर इति होवाच रामो मार्गवेयो रामो हास भा
र्गवेयोऽनूचानः श्यापर्णीयस्तेषां होत्तिष्ठतामुवाचापि नु राजन्नित्थंविदं वेदेरुत्थापयन्तीति
यस्त्वं कथं वेत्थ ब्रह्मबन्धाविति १ भाष्यः क्षत्रियो यजमानो यस्तस्य होमादिवर्णितं फ
लं नामानुचमसस्यैवात्रोपवर्ण्यते तत्रादौ क्षत्रियस्य सोमभक्षराहित्यसंप्रदर्शनार्थमु
पाख्यानमाह विश्वं शोभनं सत्त्वराजगृहं यस्य राज्ञः सोयं सुषया तस्य पुत्रः सौषद्मनः स च

६५

विश्वंतरनामकः स कदाचिद्यागं चिकीर्षुः श्यापर्णीनामकान्ब्राह्मणविशेषान् परिचक्षा
णः आर्त्विज्ये निराकुर्वन् विश्यापर्णीयं यज्ञमाजह्रे श्यापर्णीनामकब्राह्मणविरहितमेव य
ज्ञमनुष्ठितवान् तद्वृत्तं सर्वं श्यापर्णीनामका ब्राह्मणाः अनुबुध्य मनुष्यमुखादवगत्य वि
श्वंतरेण राज्ञा तदानीमनाहूता एव तं यज्ञमाजग्मुः आगत्य ते ह तत एव श्यापर्णाः तदंतर्वे
दि तस्य यज्ञस्य वेदिमध्य आसांचक्रिरे राजानुज्ञामंतरेण स्वयमेवोपविष्टवंतः राजा ता
नुपविष्टान् श्यापर्णीन् दृष्ट्वा स्वकीयान्वेत्रपाणीन् पुरुषानुवाच यद्येते श्यापर्णाः संति इमे अ
पूताये वाचोवदितारः अपूतां वाचं मदीयावज्ञारूपां वदंतः पापस्य कर्मणः कर्त्तारः धौर्त्य
रूपं व्यापारं कर्तुमुद्युक्ता इहासत इमे श्यापर्णाः मेंतर्वेदि मदीयाया वेदेर्मध्ये आसिषत स्व
यमेवोपविष्टाः इमान्धूर्तान् हे वेत्रपाणय उत्थापयत इत्येवं राज्ञोक्ता वेत्रपाणयस्तथेतं

गीकृत्य तान् श्यापर्णान् उत्थापयांचक्रुः तेषां श्यापर्णानां वृत्तांतमाह तेहेति तान्नीति वेत्रपा
णिभिरुत्थाप्यमानास्ते श्यापर्णा ब्राह्मणा रुरुधिरे स्वं ज्ञाष्टं परस्परमुच्चैर्ध्वनिं कृतवंतः त
६६ त्र धृष्टाः केचिदन्यान्प्रति कांचित्पुरातनीं कथामूचुः परिक्षितः पुत्रो जनमेजयाख्यो यो रा
जा स कदाचित् कश्यपवंशोत्पन्नान्ब्राह्मणान्विहाय विकश्यपं यज्ञं भूतवीरसंज्ञकैर्ऋ
त्विग्भिः कारयामास तदानीं कश्यपानां मध्ये केचिदसितनामकाः सोमपीथं जन
मेजयसंबंधिनं सोमयागं तेभ्यो भूतवीरसंज्ञकेभ्यो ब्राह्मणेभ्यः बलादाकृष्य स्वयम
भिजिग्युः अभितो जयं प्राप्ताः बहुषु यज्ञप्रयोगेषु विजिगीषुकथां कृत्वा ६७
तान् भूतवीरान् ब्राह्मणान् पराजयं प्रापय्य स्वयमसितमृगनामानो येजितवंतः
तैरसितमृगैः स्वकश्यपाः तत्र जनमेजयस्य यज्ञे वीरवंतः शूरपुरुषा पेता आसुः

एतत्कथामुदाहृत्य श्यापर्णाः स्वकीयान्नेवं पृच्छंति अस्माकं राज्ञा तिरस्कृतानामस्माकं म
ध्ये यः समानीयं सोमपीथं विश्वंतरस्य राज्ञः सोमयागमभिजेष्यति मनतादृशो वीरः कश्चिद
स्ति यः कोपि किमस्ति इत्येवमुच्चैः ज्ञाष्टं चक्रुः तस्य श्यापर्णानां प्रश्नस्य तन्मध्ये केनचिदु
त्तमुत्तरं दर्शयति अथ मृगयुर्नाम काचिद्योषित्तस्याः पुत्रो रामनामा कश्चिद्ब्राह्मण एवमुवा
च हे श्यापर्णा वो युष्माकं मध्ये वीरः परकीयान् विजेतुं शूरोऽहं अयमस्मि भवतां पुरतो वर्तमा
नोस्मीति तस्य रामस्य वृत्तांतमाह रामो श्यापर्णेयुणाय श्यापर्णानां ब्राह्मणानां संबंधी मृगयु
पुत्रो रामोऽनूचान सांगवेदशास्त्रपारंगत आस तत्रावस्थितवान् तेषां श्यापर्णानां वेदे कुत्ति ष्ट
तां मध्ये वस्थितो रामो विश्वंतरं प्रत्येवमुवाच हे राजन् इत्थं विदं यागसंबंधिप्रयोग प्रकार
भिज्ञं मामपि त्वदीया वेत्रपाणयो नुक्षिप्तं वेदे नुत्थापयंति तदेतदयुक्तमिति तच्छ्रुत्वा विश्वंत

65

६७

रो राजैवमुवाच हे ब्रह्मबंधो ब्राह्मणाधम रामयस्त्वं धार्ष्ट्यात् ब्रवीषि मत्त्वं कथं वेत्स्येति अत्र
राजोवाचेत्यध्याहर्तव्यं इति पंचत्रिंशोऽध्याये प्रथमः खंडः १ मूलः यत्रेंद्रं देवताः पर्यवृंजं
न् विश्वरूपं त्वाष्ट्रमभ्यमंस्त वृत्रमस्तृत यतीन्सालावृकेभ्यः प्रादादरुर्मघानवधीद्बृहस्पतेः
प्रत्यवधीदिति तत्रेंद्रः सोमपीथेन व्यार्ध्यत इंद्रस्यानुव्यृद्धिं क्षत्रं सोमपीथेन व्यार्ध्यतापींद्रः
सोमपीथेऽभवत्त्वष्टुरामुष्य सोमं न व्यृद्धमेवाद्यापि क्षत्रं सोमपीथेन स यस्तं भक्षं विद्याद्यः
क्षत्रस्य सोमपीथेन व्यृद्धस्य येन क्षत्रं समृध्यते कथं तं वेदेरुच्छाप
यंतीतिवेत्स्य ब्राह्मण त्वं तं भक्षम वेद हीति तं वै नो ब्राह्मण ब्रूहीति तस्मा एवै ते राजन्निति
होवाच २५ त्रयाणां भक्षाणामेकमाहरिष्यंति सोमं वा दधि वाऽपो वा स यदि सोमं ब्राह्म
णानां स भक्षो ब्राह्मणांस्तेन भक्षेण जिन्विष्यसि ब्राह्मणकल्पस्ते प्रजायामाजनिष्यते

६७

ऽआदाय्याऽपाय्यावसायी यथाकामप्रयाप्यो यदा वै क्षत्रियाय पापं भवति ब्राह्मणक
ल्पोस्य प्रजायामाजायत ऽ ईश्वरो हास्माद्द्वितीयो वा तृतीयो ब्राह्मणतामभ्युपेतोः स ब्रह्म
बंधवेन जिज्यूषितोऽ २ भाष्यः अथ रामः स्वकीयं वेदनं राज्ञोऽग्रे प्रकटयति यत्रेंद्रं वि
श्वं तरपदीयं वेदनं शृणु पुरा कदाचिद्देवताः इंद्रस्योपरि पंचापराधान् संपाद्य इंद्रं पर्यवृंजन्य
न्नुपरितो वर्जितवंतः यत्रयदा वर्जनं कृतं तत्र तदेंद्रः सोमपीथेन व्यार्ध्यत सोमपानेन वियु
क्तोऽभूत् इंद्रस्य ये पराधास्ते अभिधीयंते त्वष्टुः पुत्रं विश्वरूपनामानं ब्राह्मणमभ्यमंस्त इंद्रो
हिंसितवान् तथा तेन त्वष्टुरुत्पादितं वृत्रनामानं ब्राह्मणमस्तृत हिंसितवान् एतदुभयं तै
त्तिरीयैः विश्वरूपो वै त्वाष्ट्रः त्वष्टा हतपुत्र इत्यनुवाकद्वये विस्पष्टमाम्नातं तथा यतिवेष
धरान् शास्त्रविरुद्धाचारान् सालावृकेभ्यो आरण्यश्वभ्यः प्रादात् तथा प्रत्यानयत् अरुर्मघनामकान् ब्रा

ह्मणवेषानसुरानवधीत् तथा स्वगुरोर्बृहस्पतेर्वाक्यं स्वकीयेन वाक्येन अवधीत् सोयं
प्रतिघातो न्युक्तः तथा चापस्तंबः स्मरति वाक्येन वाक्यस्य प्रतिघातमाचार्यस्य वर्जयेच्छ्रे
यसां चेति एते पंचापराधाः तैर्निमित्तभूतैरिंद्रस्य सोमपाने निवारिते सति वृद्धिं तन्निवार
णमनु क्षत्रं सर्वापि क्षत्रियजातिः सोमपीथे न बाध्यते सोमपानेन वियुक्ताभूत् तदूर्ध्वं
सोमपीथे सोमपीथेपि स प्रवृत्तोभूत् तत्कथमिति तदुच्यते अमुष्य त्वष्टुः सोमं ओबलाद
पिबदिति शेषः तथा च तैत्तिरीया आमनंति स यज्ञवेशसं कृत्वा प्रासहा सोममपिबदिति त
तथा सति इंद्रेण बलात्सोमे पीते सति क्षत्रियां तरस्य तत्सामर्थ्याभावादिदानीमपि क्षत्रं सोम
पीथेन व्यृद्धमेव सोमपानरहितमेवावतिष्ठते येन भक्षविशेषेण क्षत्रं समृद्धं भवति तादृशो
योन्यो भक्षः सोमेनेन वियुक्तस्य हतत्रस्य संभवति तं भक्षं यः पुमान्विद्यात् तं तादृशं क्षत्रिय

भक्षविदमस्मादिति पुरुषं कथमेते वेत्रपा
णयो वेदेरुन्स्थापयंतीति रामस्योपालंभः
अथ रामविश्वंतरयो

क्तिप्रत्युक्ती दर्शयति वेत्थ हे ब्राह्मण राम त्वं तादृशं भक्षं किं वेत्थेति विश्वंतरस्य प्रश्नः
तदर्थोस्तुतिः वेद हि तावन्नाम्येवेति तदा रामोऽब्रवीत् हे ब्राह्मण त्वं वै तमेव क्षत्रियभक्षं नोस्माकं ब्रू
हीति विश्वंतरः पप्रच्छ हे राजन् तस्मै ते वै तादृशाय पृच्छते तुभ्यमेव कथयामीति राम उवाच
इति पंचत्रिंशोध्याये द्वितीयः खंडः २ क्षत्रियस्य हेया भक्षास्त्रिविधाः उपादेयो भक्ष एक
कः तत्र हेयान्भक्षान् दर्शयति त्रया हेयानां त्रयाणां मध्ये भक्षमेकं क्षत्रियस्य तव अ
नभिज्ञा ऋत्विज आहरिष्यंति कं भक्षयिष्याशंक्य सोमं वा दधि वा जलं वेत्युक्तं तत्र सोमप
क्षे दोषं दर्शयति स य इति सोमनभिज्ञ ऋत्विग्यदि ते विश्वंतरस्य क्षत्रियस्य सोमं भक्षमाह
रेदिति शेषः स सोमो ब्राह्मणानां योग्यो भक्षः तेन भक्षेण ब्राह्मणान् जिन्विष्यसि प्रीण
यिष्यसि न तु क्षत्रियस्य तव प्रीतिस्तथा सति तेन वराङ्गः प्रजायां संततो ब्राह्मणकल्पः

पुत्रो २
६९

इषद्समानो ब्राह्मण आजनिष्यते क्षत्रियधर्मेण शौर्येण रहितत्वात्तस्य ब्राह्मणसदृशत्वः
स चैव ब्राह्मणवत् वक्ष्यमाणगुणचतुष्टयोपेतो भवति आदानं प्रतिग्रहः तच्छील आदायी
प्रतिग्रहश्च ब्राह्मणगुणः ऋत्विग्भूत्वा सोममासमंतात्पाययतीति आपायी तदेतद्याजनम
पि ब्राह्मणगुणः अवसमन्नं तस्य संबंधिया चनमावसः तमावसं एति प्राप्नोतीत्यावसायी
परं गृहे सदा भोजनयाचनमपि ब्राह्मणगुणः काममिच्छामनतिक्रम्य यथाकामं तदनु
सारेण प्रयाप्यो निर्वासयितुं शक्यः क्षत्रियवैश्यादिवत् शौर्यधनाद्यभावात् यः को
प्यागत्य दुर्बलं ब्राह्मणं तद्गृहात्तदीयग्रामाद्वा निष्कासयितुमिच्छति इदानीमयं दुर्ब
लत्वात्तेन निःसारयितुं शक्येतेति २ मूलं अथ यदि दधि वैश्यानां स भक्षो वैश्यांस्तेन
भक्षो वैश्यांस्तेन भक्षेण जिन्विष्यसि वैश्यकल्पस्ते प्रजायामाजनिष्यतेन्यस्य बलिकृदन्यस्या

६९

द्यो यथाकामज्येयो यदा वै क्षत्रियाय पापं भवति वैश्यकल्पोस्य प्रजायामाजायत ईश्वरो
हास्माद्द्वितीयो वा तृतीयो वा वैश्यतामभ्युपेतोः स वैश्यतया जिज्यूषितोथ यद्यपः शूद्राणां
स भक्षः शूद्रांस्तेन भक्षेण जिन्विष्यसि शूद्रकल्पस्ते प्रजायामाजनिष्यतेन्यस्य प्रेष्यः कामो
त्थाप्यो यथाकामवध्यो यदा वै क्षत्रियाय पापं भवति शूद्रकल्पोस्य प्रजायामजायत ईश्व
रो हास्माद्द्वितीयो वा तृतीयो वा शूद्रतामभ्युपेतोः स शूद्रतया जिज्यूषितः २६ एते वै ते त्र
यो भक्षा राजन्निति होवाच येषामाशां नेयात् क्षत्रियो यजमानोथास्यैष स्वो भक्षो न्यग्रो
धस्यावरोधाश्च फलानि चौदुंबराण्याश्वत्थानि प्लाक्षाण्यभिषुणुयात्तानि भक्षयेत्सोस्य
स्वो भक्षो ३ भाष्यं एवमेते च त्वारो धर्माः ब्राह्मणगुणाः सोमभक्षयतो राज्ञः एतद्गुणकः
पुत्रो जायते किंच यदा प्रमादात् क्षत्रियाय पापं क्षत्रियस्य किंचिन्निषिद्धाचरणं भवति तदानीं

68

तेन पापेन स्पृष्टं तत्क्षत्रियस्य प्रजायां संततौ ब्राह्मणकल्पः श्रोत्रियराहित्यादिना ब्राह्मणसदृशः पुत्र आजायते अस्मात्पापिनः क्षत्रियात् द्वितीयो वा तृतीयो वा पुत्रो वा पौत्रो वा ब्राह्मणनामस्तुपेतोः श्रोत्रियादिगुणरहितं ब्राह्मण्यं प्राप्तुमीश्वरः समर्थो भवति स ब्राह्मणसदृशः क्षत्रियपुत्रो ब्राह्मणबंधवेन ब्राह्मणानां क्रमं बंधकत्वेन ब्राह्मणो वित्तयाच्ञादिना निर्भूषितः जीवितुमिष्टः नीचरूपं देत्यपवृत्त्या जीवितुं प्रवृत्तो भवतीत्यर्थः सोमस्य भक्षत्वे दोषमुक्त्वा रक्षोभक्षत्वे दोषमाह अथ यदि ते दधिरूपं भक्षमाहरेत् तदा दध्नो वैश्यभक्षत्वात् तेन वैश्यान् प्रीणयिष्यसि तव संततौ वैश्यसमानः पुत्र आजनिष्यते वैश्यस्य वाणिज्यं कुर्वन् अन्यस्य राज्ञो बलिकृत् बलिं पूजां करोति करं प्रयच्छतीत्यर्थः अत एवान्यस्यान्न आद्यो भक्ष्योधीनो भवतीत्यर्थः तस्य राज्ञः काममिच्छामनतिक्रम्य ज्येयोभिन्नवनीयो भवति ज्याभिन्नव इति धातुः तएतंकस्युदानप

७०

७०

राधीनत्वतिरस्कार्यत्वाख्यो वैश्यगुणः यदा क्षत्रियस्य किंचित्पापं संभवति तदा तस्य संततौ वैश्यसदृशो जायते अस्मात्क्षत्रियात्पापिनोन्यः पुत्रः पौत्रो वा वैश्यतां प्राप्तुं समर्थो भवति स च वैश्यतया वैश्यवृत्त्या करप्रदानादिना जीवितुं प्रवृत्तो भवति दधिभक्षे दोषमुक्त्वा जलभक्षे दोषमाह अथ यदि ते क्षत्रियस्य कश्चिदृत्विगपो जलं भक्षमाहरेत् तदानीं स जलात्मकः शूद्राणां भक्षः तेन च भक्षेण शूद्रान् प्रीणयिष्यति ततस्तव संततौ शूद्रसदृशः पुत्र उत्पद्यते शूद्रश्चान्यस्योत्तमवर्णत्रयस्य प्रेष्यः प्रेषणीयो भृत्यो भवति तथा कामोत्थाप्यः मध्यरात्रादौ यदा कदाचिद्दिने इच्छा भवति तदानीमप्युत्थाप्यते तदा तदीयं काममिच्छामनतिक्रम्य वध्यः कुपितेन स्वामिना ताड्यो भवति त एते शूद्रगुणाः क्षत्रियस्य कदाचित्पापे सति शूद्रसमानः पुत्रो जायते तस्मात्क्षत्रियादन्यः पुत्रः पौत्रो वा शूद्रत्वं प्राप्तुं समर्थो भवति स पुत्रः शूद्रवर्णतया

७१

दासत्वं प्राप्याजीवितुं प्रवृत्तो भवति ॥ इति पंचत्रिंशोऽध्याये तृतीयः खंडः ॥ अथ क्षत्रियोचितं भक्षं द-
र्शयितुमुक्तानां भक्षाणां क्षत्रियेण हेयतां संगृह्याह ॥ एतं क्षत्रियो यागं कुर्वन्न्येषां भक्षाणामाशा-
मिच्छामपि नेयात् न प्राप्नुयात् हे राजन् विश्वंतरते त्रयो पि एते पूर्वमुक्ताः ॥ उपादेयं भक्षं दर्शयति ॥
अथा ॥ अथ हेयभक्षकथनानंतरमुपादेयो भक्षः कथ्यत इति शेषः ॥ अस्य राज्ञ एव स्वभक्ष्यमाणः स्वो
भक्षः को सावितिसोभिधीयते ॥ न्यग्रोधस्यावरोधाः शाखाभ्यो वीरुत्खल्वेन प्ररोहंतो मूलविशेषाः
तथैवोदुंबराश्वत्थप्लक्षाख्यानां वृक्षाणां फलानि च तानि च तानि सर्वाण्यभिषुणुयात् अभिषु-
त्य च भवति रसं भक्षयेत् सोयमस्य क्षत्रियस्य क्षत्रियस्य स्वोचितो भक्षः ॥ ३ ॥ मूलं ॥ यत्र वा अ-
धिदेवा यज्ञेनेष्ट्वा स्वर्गं लोकमायंस्तत्रैतांश्चमसान्न्युब्जंस्ते न्यग्रोधा अभवन्न्युब्जा इति हाप्येनाने
नर्ह्याचक्षते कुरुक्षेत्रे ते ह प्रथमजा न्यग्रोधानां तेभ्यो हान्येऽधिजातास्ते यन्न्यञ्चो रोहंस्तस्मान्न्यङ्-

७१

रोहति न्यग्रोहो न्यग्रोहो वै नाम तं न्यग्रोहं सन्तं न्यग्रोध इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः
तेषां यश्चमसानां रसोऽवाङैत्ते ऽवरोधा अभवन् य ऊर्ध्वस्तानि फलानि स एष ह वाव क्षत्रियः स्वा-
द्भक्षान्नैति यो न्यग्रोधस्यावरोधांश्च फलानि च भक्षयत्युप ह परोक्षेणैव सोमपीथमाप्नोति नास्य
प्रत्यक्षं भक्षितो भवति परोक्षमिव ह वा एष सोमो राजा यन्न्यग्रोधः परोक्षमिवैष ब्रह्मणो रूपमुपनि-
गच्छति यः क्षत्रियः पुरोधया वै दीक्षया वै प्रवरेण वै क्षत्रं वा एतद् वनस्पतीनां यन्न्यग्रोधः क्षत्रं राजन्यो
नितत इव ह्येह क्षत्रियो राष्ट्रे वसन् भवति प्रतिष्ठित इव नितत इव न्यग्रोधोऽवरोधैर्भूम्यां प्रतिष्ठित इ-
व ॥ ४ ॥ भाष्यः ॥ अथ न्यग्रोधप्रशंसार्थं तदुत्पत्तिं दर्शयति ॥ यत्रेति ॥ देवाः पुरा यज्ञेनानिधतो यज्ञस्य कु-
रुक्षेत्रस्योपरिष्ठात् स्वर्गं लोकमायन् प्राप्नुवन् तत्र तस्मिन् यज्ञदेशे नानु सोमचमसान् न्युब्जान् अधो-
मुखानेतान् स्थापयन् अधोमुखास्ते च चमसा न्यग्रोधवृक्षा अभवन् ॥ एतदीदानीमपि तस्मिन् कुरु-

क्षेत्रे एनान्न्यग्रोधवृक्षानन्वुब्जाऽइत्यनेन नाम्नाचक्षते तेकुरुक्षेत्रदेशस्था वृक्षाभूलोकवर्त्तिनां सर्वे
षां न्यग्रोधवृक्षाणां मध्ये प्रथमजाः प्रथमं तु उत्पन्नाः तेभ्यस्तद्देशवर्त्तिन्यग्रोधवृक्षेभ्यो न्यदेशां
तरवर्त्तिनो न्यग्रोधा अधिजाताः आधिक्येनोत्पन्नाः न्यग्रोधशब्दं निर्वक्ति तेष तेच मसा यस्म
स्मात्कारणात् न्युब्जाऽधोमुखाअरोहथा उब्जृताः तस्मात्कारणात् न्युङ् अधोमुखोरोहतिशा
दुर्नवनीतिन्युत्पत्त्यान्यग्रोहः संपन्नः सचवस्तुतो न्यग्रोह इत्येव नामार्हति तस्य नाम्नो व्युत्पत्त्यनु
सारित्वात् तथापिन्यग्रोहे संतं वृक्षं लौकिकारस्य धकारादेशं कृत्वा न्यग्रोध इति परोक्षनाम्ना व्यव
हरंति देवानां आचार्योपाध्यायादीनां परोक्षनामप्रियत्वात् इति पंचत्रिंशोध्यायेचतुर्थः खंडः न्यग्रोध
वृक्षस्योत्पत्तिमुक्त्वा तदीयानामवरोधानां फलानां चोत्पत्तिं दर्शयति त्येसं तेषामधोमुखत्वेनाव
स्थितानां वटवृक्षत्वे सति चमसगतोयः रसः सोवाडैत् अधोमुखो गच्छत् तेररसविशेषाः

अवरोधाः अधोमुखत्वेनोत्पन्नाः वटशाखाभ्यो निर्गता मूलविशेषाअभवन् अथतदैलक्षण्येनयो
रस ऊर्ध्वो निरागच्छन् तानि रसरूपाणि वटफलान्यभवन् तेषामेवावरोधानां फलानां च क्षत्रियभ
क्षत्वं प्रशंसति एषयः कुमान्यग्रोधवृक्षस्यावरोधाश्च अधोमुखानि मूलानि च तत्फलानि च भक्ष
यति एषएवक्षत्रियः स्वोचिताद्भक्षान्नापैति किंचायं क्षत्रियः परोक्षेणैवन्यग्रोधव्यवधानेनैव
सोमपीथं सोमपानमुपाहृ प्राप्नोति सर्वथाप्राप्नोति अस्य क्षत्रियस्य प्रत्यक्षमव्यवधानं यथाभव
ति तथासोमोभक्षितो न भवति न्यग्रोधेनव्यवहितत्वात् योयं न्यग्रोधः एषपरोक्षमेव यथा
भवति तथा वर्त्तमानः सोमो राजा योयं क्षत्रियोस्ति एषोपि परोक्षमिव व्यवधानेनैव ब्राह्मणोभू
त्वा रूपं तदीयवेषमुपनिगच्छति पुरोधयेव पुरोहितद्वारेण दीक्षयेव दीक्षारूपसंस्कारेण च प्रव
रेणैव पुरोहितगोत्रेण च ब्राह्मणस्य च संपादितत्वादिति विशेषः प्रकारांतरेण न्यग्रोधक्षत्रिय

योः साम्यमापाद्य प्रशंसति क्षत्रं यो न्यग्रोधोऽस्ति एतन्न्यग्रोधस्वरूपं वनस्पतीनां मध्ये क्षत्रं च क्ष-
त्रियजातिरेव राजन्यो देशाधिपतिरपि क्षत्रं मनुष्याणां मध्ये क्षत्रियजातिः किंचायं क्षत्रियः इह
राष्ट्रे स्वदेशे वसन्निव हि तत्तद्ग्रामेषु संचरणेन नितरां संतत एव भवति तथा प्रतिष्ठित इव
राज्यस्थैर्येण चलनरहित एव भवति न्यग्रोधवृक्षोऽपि अधोमुखैरवरोहैर्नितत इव नित-
रां व्यास एव भवति तथा भूम्यां प्रतिष्ठित इव स्थिर एव भवति ४ मूलः तद्यत्क्षत्रियो यज-
मानो न्यग्रोधस्यावरोधांश्च फलानि च भक्षयत्यात्मन्येव तत्क्षत्रं वनस्पतीनां प्रतिष्ठापयति
क्षत्र आत्मानं क्षत्रे ह वै स आत्मनि क्षत्रं वनस्पतीनां प्रतिष्ठापयति न्यग्रोध इवावरोधैर्भूम्यां प्र-
तिराष्ट्रे तिष्ठत्युग्रं हास्य राष्ट्रमव्यथ्यं भवति य एवमेतं भक्षं भक्षयति क्षत्रियो यजमानः ५ अ-
थ यदौदुंबराण्यूर्जो वा एषोऽन्नाद्याद्वनस्पतिरजायत यदुदुंबरो भौज्यं वा एतद्वनस्पतीनाम्

७२

७३

र्जमेवास्मिंस्तदन्नाद्यं भौज्यं च वनस्पतीनां क्षत्रे दधात्यथ यदाश्वत्थानि तेजसो वा एष वनस्पतिरजा-
यत यदश्वत्थः साम्राज्यं वा एतद्वनस्पतीनां तेज एवास्मिंस्तत्साम्राज्यं च वनस्पतीनां क्षत्रे दधात्य-
थ यत्प्लाक्षाणि यशसो वा एष वनस्पतिरजायत यत्प्लक्षः स्वाराज्यं च ह वा एतद्वैराज्यं च वनस्प-
तीनां यश एवास्मिंस्तत्स्वाराज्यं वैराज्यं च वनस्पतीनां क्षत्रे दधात्येतान्यस्मै पुरस्तादुपक्लृप्तानि
भवंत्यथ सोमं राजानं क्रीणंति ते राज्ञ एवावृतोपवसथात् प्रतिवेशोऽध्वरं स्पृश्योपवसथ्यमहः एता-
न्यध्वर्युः पुरस्तादुपकल्पयेत्ताधिषवणं चर्माधिषवणे फलके द्रोणकलशं दशापवित्रमद्रीन्पू-
तभृतं चाधवनीयं च स्थालीमुदंचनं च चमसं च तद्यदेतद्राजानं प्रातरभिषुण्वंति तदेतानि द्वेधा वि-
गृह्णीयादभ्यन्यानि सुनुयान्माध्यंदिनायान्यानि परिशिंष्यात् ५ २९ भाष्यः तस्मादस्य तयोः
साम्यं न्यग्रोधवृक्षमुपसंहरति तद्य तत्तस्मान्न्यग्रोध क्षत्रिययोः सादृश्यप्रज्ञावाद्यः क्षत्रियः

(७८)

पुरुषो यागं कुर्वन्न्यग्रोधवृक्षस्यावरोधान् फलानि भक्षयेत् तदानीं वनस्पतीनां संबद्धं क्षत्रं क्ष-
त्रियाः जातिं आत्मन्येव स्वोदरमध्य एव प्रतिष्ठापयति तथैवात्मानं स्वस्वरूपं वनस्पतिसंबंधि-
नि क्षत्रे न्यग्रोधे प्रतिष्ठापयति उपसंहृतं तेन भक्षं पुनरपि प्रशंसति क्षत्रे यः क्षत्रियो यागं कुर्वन्ने-
तं न्यग्रोधसंबंधिनं भक्षं भक्षयति स क्षत्रियः स्वयं वनस्पतीनां संबंधिनि क्षत्रे न्यग्रोधे प्रतिष्ठि-
तः सं नात्मनि स्वस्मिन् वनस्पतीनां संबंधि क्षत्रं न्यग्रोधं प्रतिष्ठापयति यथा न्यग्रोधोवरोधेर्भू-
म्यां प्रतिष्ठितः एवमयं राजा राष्ट्रे प्रतितिष्ठति अस्य राष्ट्रं उग्रं तेजस्वि भवेत् अव्यथ्यं केनापि
व्यथितुमशक्यं भवति इति पंचत्रिंशोध्याये पंचमः खंडः न्यग्रोधस्यावरोधान् फलानि

च प्रशस्योदुंबरादि प्रशंसां क्रमेण दर्शयति अथयदिति अथ न्यग्रोधप्रशंसा-
नंतरं उदुंबरप्रशंसा कथ्यते ॥ ॥यद्यान्योदुंबराणि फलानि भक्षत्वा-

नोक्तानि तेषामुत्पादको य उदुंबरोस्ति एष जज्ञे ऊर्जो रसात् नाद्या[illegible] वनस्पतिरूर्ध्वे जायत एतदुदुंब-
रफलं वनस्पतीनां मध्ये भोज्यं वै भोज्यं नाहं मेव तत्रेनोदुंबरभक्षिणास्मिन्क्षत्रे ऊर्जमेव रसमेव तन्ना-
द्यान्नाद्यं वनस्पतीनां मध्ये भोजनयोग्यं द्रव्यमवस्थापयति अश्वत्थफलानि प्रशंसति अथ अ-
थोदुंबरप्रशंसानंतरमश्वत्थफलानि प्रशंसंते यान्याश्वत्थफलानि संति तेषां जनको योश्वत्थः
एष वनस्पतिः तेजस एवोदपद्यत एतदश्वत्थफलं वनस्पतीनां संबंधि साम्राज्यस्वरूपमेव तत्ते-
नाश्वत्थफलभक्षेण तेज एव वनस्पतीनां साम्राज्यं चास्मिन् क्षत्रे स्थापयति प्लक्षफलानि प्रशंस-
ति अथ अथाश्वत्थप्रशंसानंतरं यानि प्लक्षफलानि विद्यंते तानि प्रशंसति यो यं प्लक्षोस्ति एष व-
नस्पतिर्यशस एवोत्पन्नः एतत् प्लक्षफलं वनस्पतीनां संबंधि स्वाराज्यं वैराज्यरूपं स्वातंत्र्येण रा-
जत्वं स्वाराज्यं विशेषेण राजत्वं वैराज्यं तत्तेन प्लक्षफलेनास्मिन्क्षत्रे यशश्च स्वाराज्यं वैराज्यं संपा

७५

दयति तस्य द्रव्यं प्रशस्यते स्वप्रयोगमाह एता एतानि न्यग्रोधावरोधादीन्यस्य राज्ञोर्थे सोम
क्रयात्पूर्वमुपकल्पानि संपादितानि च भवंति ततऊर्ध्वं सोमक्रयः ततस्तेध्वर्युप्रभृतयोराज्ञ
एवाहृता सोमस्यैवप्रकारेणोपवसथदिनात्पूर्वं प्रतिवेशीः प्रसिद्धैः क्रियाविशेषैश्चरंत्यनु
ष्ठेयुः अथानंतरं औपवसथ्यमहः औपवसथ्येहन्यध्वर्युः पुरस्तात्प्रथमं एतानि वक्ष्यमा-
णानि चमसादीनि उपकल्पयेत् संपादयेत् यस्मिन्चर्म्मणि सोमोभिषूयते तत्चर्माधिषवण
ख्यं ययोः फलकयोरभिषूयते ते फलके अधिषवणसंज्ञके द्रोणकलशं द्रोणरूपानं दशा
पवित्रं वस्त्रं अद्भयो निषवणार्थं ग्रावाणः पूतभृत् आधवनीयात्र विशेषो स्थाली कंतः उदंचनं
उन्नयनपात्रं चमसोत्तक्षार्थं दारूपात्रं यन्नेतान्यध्वर्युः संपादयेत् ऊर्ध्वं यद्यदा एतत् एतेरा
जानं प्रातःकाले अभिषुण्वंति तत्तदानीमेतानि न्यग्रोधावरोधादीनि द्वेधा विभजेत् तत्रान्यानि

७५

एकनागगतानि तस्मिन्प्रातःसवने भिषुणुयात् इतरन्नागगतानि तु माध्यंदिनसवनाय स्थापये
त् इति पंचविंशोध्यायेषष्ठः खंडः ५ मूलं तद्यत्रैतांश्चमसानुन्नयेयुस्तदेतं यजमानचमस
मुन्नयेत्तस्मिन्वेदं तरूणकेप्रास्तस्यातां तयोर्वषट्कृतेतः परिधिपूर्वं प्रास्येदधिकारेणेअ
कारिषमित्येतयज्जुसि स्वाहाकारयानुवषट्कृते परमास्काः ग्रावस्यासायेंचक्षुषीरितितद्यत्रैतां
श्चमासानाहरेयुस्तदेतं यजमानचमसमाहरेत्तान्युन्नोजुह्वीयुस्तदेनयुयो जुहोयात् द्यदेलो
होतोपह्वयेत यदाचमसं भक्षयेद् एथेनमेतया भक्षयेद् यद्दत्राशिष्टं रसिनः सुतस्य यदिंद्रोऽअपिब
च्छचीभिः इदंतदस्य मनसा शिवेन सोमं राजानमिह भक्षयामीति शिवोहवा ऽअस्मा ऽएषवान
स्पत्यः शिवेन मनसा भक्षितो भवत्युग्रं हास्य राष्ट्रमव्यथ्यं भवति य एवमेतं भक्षं भक्षयति क्षमि
यो यजमानः शं न ऽएधि हृदे पीतः प्रण ऽआयुर्जीवसे सोम तारीरित्यात्मनः प्रत्यभिमृशति ऽईश्वरो

हवा ऽएषो ऽत्र स्वभिमृष्टो मनुष्यस्यायुः प्रत्यवहर्त्तोरन्तर्हेऽस्मा भक्षयतीति तद्यदेतेनात्मानमभिमृशत्या
त्मायुरेवतत्प्रतिरते ऽआप्यायस्व समेतु ते सं ते पयांसि समु यन्तु वाजाः ऽइति चमसमाप्याययत्यभि ७६
रूपामाप्याययद्यज्ञेऽभिरूपं तत्समृद्धं ६ ३० भाष्यः अथास्य फलचमसोन्नयनादिप्रयोगं दर्शय
ति तत्र तत ऊर्ध्वं यत्र यदा एतान् ब्रह्महोत्रादिचमसान् दशसंख्याकानुन्नयेयुः तत्तदानीं यज
मानस्य राजन्यस्य चमसमुन्नयेत् अभिषुतेन न्यग्रोधावरोधादिना पूरयेत् तस्मिन् पूरिते चमसे त्सं
दर्भद्वयं प्रक्षिप्य तयोर्मध्ये प्रथमं प्रक्षिप्तं दर्भं वषट्कृते [illegible] वषट्कारे कृते सति दधिक्रा
व्ण इत्येतत्पर्वा स्वाहाकारसहितया परिधी नामंतः प्रक्षिपेत् अथास्य फलचमसस्य भक्षणं वि ७५
धत्ते तत्र ततो होमादूर्ध्वं यत्र यदा एतान् होत्रादीनां चमसान् ऋत्विजः आहरेयुः तत्तदानीमेतं
यजमानस्य राजन्यस्य चमसमाहरेत् तानाहृतान् होत्रादिचमसान्यत्र यदा उद्गृह्णीयुः भक्षणा

र्थमूर्ध्वं धारयेयुः तत्तदानीमेतं यजमानस्य राजन्यस्य चमसमुपोद्गृह्णीयादूर्ध्वं धारयेत् तत ऊर्ध्वं यदा
हातेत्यामुपह्वयेत उपह्वयध्वमित्युक्तीयं चमसं यदा भक्षयेत् अथ तदानीमेनं यजमानं चमसं एत
यावक्ष्यमाणया ऋचा राजा भक्षयेत् तामृचं पठति यद रसिनो रसयुक्तस्य सुतस्याभिषुतस्यावरो
धादिद्रव्यस्यात्र पात्रे य उच्छिष्टो वशिष्टो भागः यच्च पात्रस्थं द्रव्यं इंद्रः शचीभिः कर्मविशेषैः सं
स्कृतमपिबत् शचीशब्दः कर्मनामसु पठितः अस्य द्रव्यस्य संबंधि तदिदं शिष्टं शिवेन भक्तियु
क्तेन या मंगलेन मनसेह कर्माणि सोमं राजानं सोमराजरूपं भावयित्वा भक्षयामि तदिदं सम
न्त्रकं भक्षणं प्रशंसति शिवो यः क्षत्रियो यजमानः एवमुक्तेन प्रकारेणैतं फलचमसरूपं भक्षं
भक्षं भक्षयति अस्मै यजमानाय एष वानस्पत्यो वानस्पत्यो भक्षः शिवो ह वै मंगलो हितका
री भूत्वा शिवेन मनसा भक्तियुक्तेन मंगलेन मनसा भक्षितो भवति अस्य राज्ञो राष्ट्रमुपयं प्रारुणा (75)

मभिभवेनायोग्यरूपं भूत्वा केनाप्यव्यथ्यं व्यथयितुमशक्यं भवति भयं चलनं वा कदाचिदपि ना
स्य राष्ट्रस्य भवतीत्यर्थः भक्षादूर्ध्वं मंत्रेण आत्मनः स्पर्शं विधत्ते शं न हे सोम सोमस्थानीयाव

रोधादिभक्षास्माभिः पीतः सन्नोस्माकं हृदयशमे धि सुखहेतुर्भवति जीव से चिरजीवित्वनाया
नोस्माकमायुः प्रतारीः प्रकर्षेण संपादय इत्यनेन मंत्रेणात्मनः स्वकीयऽहृदयस्य प्रत्यभिम
र्शः हस्तेन संपूर्णः स्पर्शः कर्तव्यः अथान्वयव्यतिरेकाभ्यामभिमर्शप्रशंसेति ईश्वर एयो
वरोधादिभक्षः अप्रत्यभिमृष्टः मंत्रपूर्वकात्मस्पर्शरहितः सन्मनुष्यराष्ट्रः आयुः प्रत्यवह
र्त्तोर्विनाशयितुमीश्वरः समर्थो भवति केनाभिप्रायेणेति सोभिधीयते अनर्हं भक्षयि

तुमयोग्यः सन्मां भक्षयतीति तस्य भक्षस्याभिप्रायः सोयं व्यतिरेकः तद्यदित्यादिरन्वयः
तत्र शं न क्षणादूर्ध्वं यथैतेन शं न इत्यादिमंत्रेणाभिमृशति तत्तेनाभिमर्शनायुरेव प्रतिरते

प्रकर्षेण वर्द्धयति द्वाभ्यामृग्भ्यां तस्य चमसस्य पूरणं विधत्ते अ प्रथमामृचं आप्यायस्वेति श्रव
णाद्वितीयस्यास्तृतीयादेश्चाप्यायमान इति श्रवणाद्दिदं मंत्रद्वयमाप्यायनस्याभिरूपमनु
कूलं यज्ञेयदंगमभिरूपमनुकूलं क्रियते तदंगं समृद्धं संपूर्णं भवति इति पंचत्रिंशोध्याये स
प्तमः खंडः ६ मूलः तद्यत्रैतांश्चमसान्सादयेयुस्तदेतं यजमानचमसं सादयेतान्यत्र प्र
कंपयेयुस्तदेनमनुप्रकंपयेदथैनमाहृतं भक्षयेन्नाराशंसपीतस्य देव सोम नेमतिविदऊ
मैः पितृभिर्भक्षितस्य भक्षयामीति प्रातःसवने नाराशंसो भक्षऽऊवैरिति माध्यंदिने का
व्यैरिति तृतीयसवने तदेतत्पितृनेवाप्तान्सवनभाजः करोति सर्वा ह वै सोमपा इति ह
स्माह प्रियव्रतः सोमपोयः कश्च सवनभागिस्मृता हवा अस्य पितरः सवनभाजो भवंति
उप्रग्हास्यराष्ट्रमव्यथ्यं भवति य एवमेतं भक्षं भक्षयति क्षत्रियो यजमानः समान आत्मनः

प्रत्यभिमर्शः समानमाप्यायनं चमसस्य प्रातःसवनस्यैवाहृता प्रातःसवने चरेयुर्माध्यंदिनस्य मा
ध्यंदिने तृतीयसवनस्य तृतीयसवने तमेवमेतं भक्षं प्रोवाच रामो मार्गवेयो विश्वंतराय सौष
स्मनाय तस्मिन्होवाच प्रोक्ते सहस्रमु ह ब्राह्मणानुस्पंदद्युः सत्रपापर्णौ उमे यज्ञद्वत्येतमु हे
वप्रोवाच चतुरः कावषेयो जनमेजयाय पारीक्षिताय हैतमु हैव प्रोचतुः पर्वतनारदौ सोमका
य साहदेव्याय सहदेवाय सांजयाय बभ्रवे दैवावृधाय भीमाय वैदर्भाय नग्नजिते गांधारायैत
मु हैव प्रोवाचाग्निः सनश्रुतायारिंदमाय क्रतुविदे जानकय एतमु हैव प्रोवाच वसिष्ठः सुदासे
पैजवनाय ते ह ते सर्व एव महज्जग्मुरेतं भक्षं भक्षयित्वा सर्वे हैव महाराजाऽऽसुरादित्य
इव ह स्म श्रिया प्रतिष्ठितास्तपंति सर्वाभ्यो दिग्भ्यो बलिमावहंत आदित्य इव हैव श्रियां प्रतिष्ठि
तस्तपति सर्वाभ्यो दिग्भ्यो बलिमावहत्युग्रं हास्यराष्ट्रमव्यथ्यं भवति य एवमेतं भक्षं भक्षयति

क्षत्रियो यजमानो यजमानः ॥ इति सप्तमपंचिकायां पंचमोऽध्यायः ॥ समाप्तेयं पंचिका
भाष्यः ॥ भक्षितायापि तस्य नराशंस संज्ञस्य चमसस्य प्रयोगं विधत्ते तद्य तस्मादाप्यायना
दूर्ध्वं यत्र यदा एतान्होत्रादीनां चमसानाप्यायितान्सादयेयुः तदानीमेतं यजमानस्य राजश्चम
सं सादयेत् ॥ तान्होत्रादीनां चमसान्यदा प्रकंपयेयुः तदैवैनं राजचमसमनुप्रकंपयेत् ॥ अथा
नंतरमेनं चमसं भक्षणार्थमाहृत्य नराशंसेत्यादिमंत्रेण भक्षयेत् ॥ हे सोम मसदृक्फल चमस
देव नराशंसपीतस्य नरा मनुष्या तत्स्तुप्रसुस्ताः शंसंति यस्मिन्सवनविशेषे सोऽयं नराशंसः त
त्रदेवैः पीतस्य उमनामभिः पितृभिश्च भक्षितस्य मतिविदोस्मदभिप्रायाभिज्ञस्य तेन भक्षया
मि इत्यनेन मंत्रेण प्रातःसवने नराशंसचमससंबंधी भक्षः कर्तव्यः ॥ इतरयोस्तु सवनयोस्त।
स्मिन्मंत्रे ऊमैरित्यस्य पदस्य स्थाने ऊर्वैः काव्यैरिति पदद्वयं क्रमेण पठनीयं ॥ त्रिविधमंत्र

७९

तात्पर्यं दर्शयति ऊमा वै ऊमा ऊर्वाः काव्याः इत्येते सवनत्रयगताः पितृविशेषाः अतस्तच्छब्दप्र
योगेण तान्पितॄन्सवनत्राजः करोति पितरश्च द्विविधाः अमृता मृताश्च इदानीं मनुष्याः संतो म
रणाद् ऊर्ध्वं पितृलोकं प्राप्ता मृताः सृष्टिमारभ्य पितृलोके वस्थिता अमृता ऊमादयस्तथाऽवि
धत्वाद् एतच्छब्देन विशेष्यंते अथ मंत्रतात्पर्यं मतांतरं दर्शयति न केवलमूमादय एव पित
रः प्रसिद्धा अमृताः किंतु यः कोऽपि पिता सवनत्राग्भवति स सर्वोऽप्यूमादिशब्दैरुपलक्षितत्वा
द् अमृतत्व एव भवतीति सोमपाः सोमपः प्रियव्रतो ख्यामहर्षिणा हस्मैः इदानीं नराशंसचम
सभक्षं प्रशंसंति अमृ० अस्य राज्ञो भक्षयितुः पितरः पितृपितामहादयः सर्वेऽपि सवन
त्राजः संतो मृताः मरणरहिता देवा भवंति उयमित्यादि पूर्ववत् शं न इत्यादि मंत्रेणास्य
देहस्य — — माप्यायस्वेति मंत्रद्वयेन चमसप्रहरणं (?) सवनेयेदुक्तं तदुत्तरयोः सव

७९

नयोरिति दिशति समा० फलचमसे विद्यमानं प्रयोगविशेषमभिधाय अवशिष्टं सोमभक्षम
सगतं प्रयोगं सवनत्रयेऽप्यतिदिशति प्रातः० सोमविषयस्य प्रातःसवनस्येवावृत्ताप्रकारेण
फलचमसविषयप्रातःसवने वरेयुरनुतिष्ठेयुः एवमितरत्रापि यो अप्युक्तं चमसभक्षमुपसं
हरति तमे० अथ विश्वंतरस्य वाक्यं दर्शयति तस्मिन्नस्मिन् राजन्नसेरामेण प्रोक्ते सति
स राजा रामं प्रत्येवमुवाच हे ब्राह्मण राम तुभ्यं वयं सहस्रमुह गवां सहस्रं संपूर्णं दद्युः स्तु
रामेय ज्ञो विश्वापर्ण आसीत् इदानीं तु सभापर्णया वास्तु भवदीया ग्रूपापर्णी नामकाः
सर्वे ब्राह्मणाः अस्मिन्यज्ञे व संत्विति इदानीं संप्रदायकथनेन भक्षं प्रशंसति एतं०ए
तं पूर्वोक्तमेव भक्षं कवषस्य पुत्रस्तुरनामको महर्षिः परीक्षित्पुत्राय जनमेजयसंज्ञायप्रो
वाच अयमेकः संप्रदायः तथैवैवं भक्षं पर्वतनारदाख्यावृषी सह देवस्य पुत्राय सोम

(78)

८०

कायप्रोचतुः सोमकश्चास्मैसहदेवायप्रोवाच सहदेवश्चसांर्जयायप्रोवाचसांर्जयश्च बभ्रवे
प्रोवाच बभ्रुश्चदैवावृधायप्रोवाच दैवावृधश्चभीमायप्रोवाचभीमश्चवैदर्भायप्रोवाचवैदर्भ
श्चनग्नजितेप्रोवाच नग्नजिच्चगांधारायप्रोवाच अयंद्वितीयःसंप्रदायः तथैतमेवनक्षत्रंअग्नि
नामकोमहर्षिःसनश्रुतायप्रोवाचसनश्रुतश्चारिंदमायप्रोवाचअरिंदमश्चक्रतुविदेप्रोवाचक्रतु
विच्चजानकयेप्रोवाचअयंतृतीयःसंप्रदायः अथैतमेवनक्षत्रंवसिष्ठोमहर्षिःसुदासेमहर्षयेप्रोवाच
सुष्टुधनंदासतीतिसुदाःअथवासुष्टुशत्रून्दस्यत्युपक्षयतीतिसुदाः सचपैजवनायप्रोवाच यद्यासह
देवायसांर्जयेत्यारिषुवाक्येषुसहदेवादिनाम्नांसांर्जयादिपदानविशेषणतयायोजनाद्वितीयस्तछष्
रानछष्टार्थ्यःतेहेतेतुरादय्यःपैजवनांताःसर्वएवपुरुषाःएतंफलचममनक्षत्रंनक्षयित्वामहत्त्वमुर्महत्वंप्राप्ताः
महत्वस्यैवसर्वैहेत्यादिकंविवरणंसर्वेप्येतेमहाराजाःसार्वभौमाआसुः यथादित्योद्युलोकेप्रतिष्ठितस्तपति

८०

८१

एवमेतेश्रियांगजात्याद्विकायांसंपद्विप्रतिष्ठिताःसंतस्तपंतिशत्रूणांतापंकुर्वंतितथासर्वा
भ्योदिग्भ्यःसर्वदिगवस्थितेभ्योराजभ्यःसकाशाद्बलिमावहंतःकरप्रदेशानास्वामिनोभवंतिनरा
शांसनक्षत्रंपुनरपिफलकथनेनप्रशंसति आद्विं इतिमाधवीयेवेदार्थप्रकाशेऐतरेयब्राह्म
णेपंचत्रिंशोध्यायेष्टमःखंडःसमाप्तः॥ ॥ ॥संवत् १८५९ ॥

८१

[OrderDescription]
,CREATED=23.10.20 12:11
,TRANSFERRED=2020/10/23 at 12:23:12
,PAGES=79
,TYPE=STD
,NAME=S0004463
,Book Name=M-1138-ETREY BRAHMAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,